CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Almira 2
Shelf 2
28

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेखकः नन्दिकेश्वरः

नं० ४२९२

श्रीशान्तिकाध्यायकोपुस्तक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ शांतिः ॥
॥१॥

श्रीगणेशायनमः ॥ ॐ नमः श्रीभवानीसंकराभ्यां ॥ नन्दिकेश्वरउवाच ॥ अतःपरमि
दंगुह्यंतडोशीनंमहोदयं ॥ महाविघ्नप्रशमनंमहाशान्तिकांपरं ॥१॥ अकालमृत्यु
शमनंसर्वव्याधिनिवारणं ॥ परचक्रप्रशमनंसदाविजयवर्द्धनम् ॥२॥ सर्वदेवग्रहाणी
कंसमाभीष्टफलप्रदम् ॥ सर्वशान्त्यधिकारस्थंधर्म्मंवक्ष्यामिशाश्वतं ॥३॥ शशां
कार्द्धधरस्त्र्यक्षोनागयज्ञोपवीतकः ॥ चतुर्भुजश्चतुर्बाहुःक्षितभस्मावगुण्ठितः ॥४॥
गौरीवरोगणावरदोदेवदेवोमहेश्वरः ॥ त्रैलोक्यनामितःश्रीमान्शान्तिमाण्डकरोतुमे ॥५॥

॥ एमः ॥
॥१॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वावयवपूर्णाङ्गी नगाधेराजतनुर्मध्यमा ॥ पीनश्यामा नितम्बेनारक्तिमवर्णेन शोभना
॥६॥ ललाटे तिलको येन चन्द्ररेखार्द्धधारिणी ॥ चित्राम्बरधरा देवी सर्वाभरणभूषि-
ता ॥७॥ वराङ्गी मयरूपेण शोभन्ते नामहास्पदा ॥ भावनामात्रसंतुष्टा उमादेवी नर-
प्रदा ॥८॥ साक्षादागत्य रूपेण शान्तेनामिततेजसा ॥ शान्तिं करोतु मे प्रीता भक्तानां भ-
क्तवत्सला ॥९॥ पद्मरागद्युतिः सौम्यो रक्तमाल्यानुलेपनः ॥ अबालो बालरूपेण षड्-
वक्त्रः शिखिवाहनः ॥१०॥ पूर्णेन्दुवदनः सौम्यो द्विशिखः शक्तिसंयुतः ॥ कुमारिको मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ शांति ॥
॥२॥

ग्निरुग्राक्षसमुद्भूतःसुरार्च्चितः ॥११॥ कार्त्तिकेयोमहातेजावादानैकतत्परः ॥ शान्तिं
करोतुमेनित्यंवरंसौख्यंचमेसदा ॥१२॥ श्वेतवस्त्रपरिधानश्चप्रसःकनकसुप्रभः ॥
रुद्रश्चैवोमहायोगीरुद्रैकाहितमानसः ॥१३॥ शूलपाणिर्महाप्राज्ञोनन्दिकेशःशि
वभावितः ॥ शिवार्च्चनपरोनित्यंशिवध्यानैकतत्पर ॥१४॥ शान्तिंकरोतुमेशान्तोध
र्म्मेचमतिमुत्तमाम् ॥ महादेवोमहाकायःत्रिनेत्रश्चनचयष्टिधृः ॥१५॥ एकदंष्ट्रो
लकर्णदेवोगजवक्त्रोमहाबलः ॥ नागयज्ञोपवीतीचनागाभरणभूषितः ॥१६॥ स

॥ एम: ॥
॥२॥
2

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्वार्थसंपदाधीशोगणाध्यक्षोवरप्रदः॥ रुद्रस्यतनयोदेवोनायकोथविनायकः॥१७॥
करोतुमेमहाशान्तिंकर्मसिद्धिंचमेसदा॥ इन्द्रनीलनिभस्कन्धश्योदादन्तम्भूलाग्रधो घ
नः॥१८॥ रक्ताम्बरधरः श्रीमानक्रहन्तागोनागभूषणः॥ पापापनोदमतुलमलक्ष्मीम
लनाशनं॥१९॥ करोतुमेमहाशान्तिंमहाकालोमहाबलः॥ पीतवस्त्रपरीधानाक
न्यारूपास्वलंकृता॥२०॥ गणामातान्विकाच्यक्षाप्रपागौरीश्वरेश्वरी॥ सर्वसिद्धि
करीदेवीप्रसादपरमापरा॥२१॥ शान्तिंकरोतुमेमातासिद्धिंचातुप्रयच्छतु॥ स्निग्ध

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूपामेनवर्णेनमहामहिषमर्द्दिनी ॥२२॥ धनुश्चक्रप्रहरणखड्गपट्टिशधारिणी ॥ आ
नर्जन्मुघनकारसर्वोपद्रवनाशिनी ॥२३॥ सर्वमङ्गलमानामेशिवमानाचक्रकुवं
॥ निर्मांसिनरारीरास्नायुस्थिमुनिबन्धनः ॥२४॥ अतिसूक्ष्मोतिविक्रान्तस्त्रसो
भंगगिरिर्महान् ॥ रुद्रात्मकोमहावीरोरुद्रैकाहिनमानसः ॥२५॥ सोपिमेशान्ति
भावेनशान्तिमाप्नुयच्छतु ॥ प्रचण्डगणासैन्येशोमहाचण्डकासधारकः ॥२६॥ असं
मालार्पितकाक्षश्चाडेभ्योवरः ॥ चण्डपापापहरणोत्रसहन्यादिशोभकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करोतुमेमहायोगीकल्याणानाम्यां परां ॥ संरक्तकुन्देन्दुतुल्याभःकरोतुमङ्केतप्रभ
॥२८॥ अक्षमालाशिवायस्यः स्वयंज्ञानाव्यवस्थितः ॥ चतुर्मुखश्चतुर्घा
स्त्रिनेत्रस्सर्वतोज्वलः ॥२९॥ क्षितिपतिर्द्दृष्टोदेवोधर्म्मोधर्म्मेतमोमतः ॥ ईश्वर
स्तिनिषेधेनतस्माद्धर्म्मोजगत्प्रभुः ॥३०॥ वृषोवृषध्वजः श्रीमानकरोतुममशान्ति
कांमम ॥ पद्मासनःपद्मनिभश्चतुर्वदनपंकजः ॥३१॥ कमण्डलुधरःश्रीमान्दे
वपञ्चवर्वसुजितः ॥ शिवध्यानैकपरमःशिवसद्भावभावितः ॥३२॥ ब्रह्मशब्देनादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ शांति ॥
॥ ४ ॥

ध्येनब्रह्मशान्तिंकरोतुमे ॥ नागासनश्चतुर्बाहुः शंखचक्रगदाधरः ॥ २३ ॥ श्यामः पी
ताम्बरधरोमहाबलपराक्रमः ॥ यज्ञदेहोत्तमोदेवोमाधवोमधुसूदनः ॥ २४ ॥ शिवप्र
शादसम्पन्नः शिवध्यानपरायणः ॥ सर्वपापप्रशमकः सर्वज्ञानिकृन्तक ॥ २५ ॥ सर्व
दा शान्तभावेनविष्णुः शान्तिंकरोतुमे ॥ अर्हन्तः शान्तरूपी चपिच्छस्कंधैकपाणिकः
॥ २६ ॥ दिग्वासामलपंकश्च सौम्यचित्तसमाहितः ॥ संमुक्तलोचनः शान्तः शिव
ज्ञानैकचिंतकः ॥ २७ ॥ शान्तिंकरोतुमे शान्तः शिवयोगेनभाविनः ॥ जितेन्द्रिय

॥ राम: ॥
॥ ४ ॥

समाधिस्थपार्वतीवरभूषितः ॥ ३८ ॥ वरदाभयपाणिश्च ज्ञानध्यानरतः सदा ॥ योग
दृष्टिसमायुक्तः शिवज्ञानेनभावितः ॥ ३९ ॥ शान्तिंकरोतु मे छत्रो वज्रकायो महाकृपः
पिनवर्णेनदेहेनहारेणासुविचित्रिना ॥ ४० ॥ सर्वाङ्गसुन्दरादेवीविजयाजयकारि
णी ॥ शिवार्चनरतानित्यंशिवजाप्यपरायणा ॥ ४१ ॥ धीधीलोकमानाचनित्यं
शांकरोतु मे ॥ नन्दाभद्राचसुरभिः सुशीलासुमनास्तथा ॥ ४२ ॥ क्षीरोदादुत्थिता
गावोलोकानांहितकाम्यया ॥ प्रीणयन्तिसदादेवान्विप्रांश्चैवविशेषतः ॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्यं तु देवतात्मानः कुर्वन्तु मम शान्तिकम् ॥ पद्मरागप्रभा देवी चतुर्वदनपंकजा ॥
अक्षमालार्पितकरा कमण्डलुधरा शुभा ॥ ४४ ॥ ब्रह्माणी सौम्यवदना शिवपूजापरा
यणा ॥ शान्तिं करोतु मे प्रीता ब्रह्मशब्देन सर्वदा ॥ ४५ ॥ हिमशैलनिभा देवी महावृष
भवाहिनी ॥ त्रिशूलहस्ता वरदा नानाभरणभूषिता ॥ ४६ ॥ चतुर्भुजा चतुर्वक्त्रा त्रिनेत्रा
पापहारिणी ॥ आर्त्तिं हरतु मे प्रीता रुद्राणी निर्मलोज्ज्वला ॥ ४७ ॥ मयूरवाहना देवी
सिन्दूरारुणविग्रहा ॥ शक्तिहस्ता महाकाया सर्वालंकारभूषिता ॥ ४५ ॥ रुद्रभक्ताम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्यीर्च्यारुद्रार्चनरतासदा ॥ कौमारीवरदादेवीशांतिमाशुददातुमे ॥ ४९ ॥ शंखचक्रग
दाहस्ताश्यामापीताम्बरप्रिया ॥ चतुर्भुजानार्क्ष्ययानावैष्णवीसुरपूजिता ॥ ५० ॥ शि
वार्चनपरानित्यंशिवैकाहितमानसा ॥ शांतिंकरोतुमेनित्यंसर्वासुरविमर्दिनी ॥ ५१ ॥
ऐरावतगजारूढावज्रहस्तामहावला ॥ नेत्राणांतुसहस्रेणभूषिताकनकप्रभा ॥
५२ ॥ सिद्धगन्धर्वनमितासर्वालंकारभूषिता ॥ ऐंद्रीदेवीसदाकालंशांतिमाशुकरोतु
मे ॥ ५३ ॥ वाराहघोराविकटवराहवरवाहना ॥ श्यामावदातविपुलाशंखचक्रग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ शांति॰ ॥
॥ ६ ॥

दाउधा ॥ ५४ ॥ तर्ज्जयन्तीसदाविघ्नानर्चयन्तीसदाशिवं ॥ वाराहीवरदादेवीक्षेमारोग्यं
ददातुमे ॥ ५५ ॥ उर्ध्वकेशाकोटराक्षीनिर्मांसास्नायुबन्धना ॥ करालवदनाघोराखड्ग
कट्टारकोघना ॥ ५६ ॥ कपालमालिनीक्रुद्धाखट्वांगवरधारिणी ॥ आरक्तपिंगनय
नानागचर्म्मावगुण्ठिता ॥ ५७ ॥ नानानागोपवीतांगीप्रेतस्थाननिवासिनी ॥ शिवरूपे
णघोरेणशिवारावभयंकरी ॥ ५८ ॥ चामुण्डाचण्डरूपेणमहारक्षांकरोतुमे ॥ आपीतेन
शरीरेणनानाभरणभूषिता ॥ ५९ ॥ आतर्ज्जयन्तीविघ्नानिज्वलनत्खट्वांगधारिणी ॥

६

॥ राम: ॥
॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धांशासना महावीरा सर्वपापप्रणाशिनी ॥ २० ॥ लक्ष्मी श्रीबाहुदेवी शांति माङ्फ
रोतुमे ॥ आकाशमातरोदिव्यास्तथान्यालोकमातरः ॥ भूतानामातरः सर्वा
स्तथान्याः स्वमातरः ॥ २१ ॥ सर्वमातृमहादेव्यः स्वायुध्यान्नपाणयः ॥ अगस्त्या
प्यावति पद्मनिवालिका मामहोदयाः ॥ २३ ॥ रुद्रस्मृता महावीर्य्यारुजाव्याहित
मानसाः ॥ शांतिं कुर्वन्तु मे नित्यं मातरः स्त्रोप्रजिता ॥ २४ ॥ ये रुजा रौद्रकर्म्माणो
रुद्रस्थाननिवासिनः ॥ सौम्यास्थै चतुयेकेचित्स्थाणुस्थाननिवासिनः ॥
॥

॥शांति॥
॥७॥

६५॥ मानेरोरुद्ररूपाश्च गणानामधिपाश्च ये॥ विघ्नभूतास्तथा चान्ये दिग्विदिक्षु स
माश्रिताः॥ सर्वे सुप्रीतिमनसः प्रतिगृह्णन्तु मे बलिं॥ सिद्धिमाश्रप्रयछन्तु भये
भ्यः पान्तु मां सदा॥ ६६॥ ऐन्द्रादि दिग्गणा ये तु वज्रहस्ता महाबलाः॥ कुम्भेनाभ्याः
श्वेतनिभास्तथा वैश्वेतलोहिताः॥ ६७॥ दिव्यान्तरिक्षभौमाश्च पातालवासिनः॥ रुद्रा
र्चनान्नाहुत्याः शान्तिं कुर्वन्तु मे सदा॥ ६८॥ आग्नेय्यां ये गणाः सर्वे स्रुवहस्तानि षड्गि
ण॥ आरक्ताश्वारक्तानिभास्तथा वैरक्तलोहिताः॥ ६९॥ दिव्यान्तरिक्षभौमाश्च पाता

॥राम॥
॥७॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लेनलवासिनः॥ रुद्रप्रणामममनसः शांतिं कुर्वन्तु मे सदा ॥७०॥ याम्यां दिशि ग
णा येतु सततं दण्डधारणाय: ॥ कृष्णाः कृष्णनिभाः कृष्णास्तथा वै कृष्णलोहिताः॥
७१॥ दिव्यांतरिक्षभौमाश्च पातालतलवासिनः॥ रुद्रैकाहितचेतस्काः शांतिं कुर्वन्तु मेस
दा ॥७२॥ नैरृत्यां तु गणाः क्रूरा राक्षसास्तनुरूपिणः॥ सुनीला नीलनिभास्तथा वै
नीललोहिताः॥७३॥ दिव्यांतरिक्षभौमश्च पातालतलवासिनः॥ रुद्रध्यानैकनिरताः शां
तिं कुर्वन्तु मे सदा ॥७४॥ वारुण्यां वै गणा येतु सततं पाशधारणाय: ॥ सुश्यामाश्यामाः श्याम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥शांति॥ निभास्तथावैधूम्रपामलोहिता: ॥७५॥ दिव्यान्तरिक्षभौमाश्चपातालतलवासिन: ॥ प
॥८॥ रमेशार्च्चनरता: कुर्वन्तुममशांतिकं ॥७६॥ वायव्यांवैगणायेतुसततंध्वजपारायः ॥ सु
पीताभा: पीतनिभास्तथावैपीतलोहिता: ॥७७॥ दिव्यान्तरिक्षभौमाश्चपातालतलवा
सिन: ॥ शिवभक्ति: परासर्वेक्षेमंकुर्वन्तुमेसदा ॥७८॥ उत्तरस्यांगणायेतुसततंत्वी
धिपारायः ॥ श्वावलाभा: श्वावलनिभास्तथाश्वावललोहिता: ॥ दिव्यान्तरिक्षभौमा ॥राम:॥
श्चपातालतलवासिन: ॥ शिवपूजासमायुक्ता: क्षेमंकुर्वन्तुमेसदा ॥ ऐशान्यांवैगणा ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येतु प्रशांताः शूलपाणयः ॥ सूक्ष्माः सुसूक्ष्मसदृशास्तथावै सूक्ष्मलोहिता ॥ ८१ ॥
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ॥ शिवपूजा समायुक्ताः क्षेमं कुर्वन्तु मे सदा
॥ ८२ ॥ अधोभागे गणायेतु सततं शूलपाणयः ॥ धूम्राधूम्रनिभाः सर्वे तथावै धूम्र
लोहिताः ॥ ८३ ॥ दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ॥ शिवं कुर्वन्तु मे नित्य
मलक्ष्मीमलनाशनं ॥ ऊर्द्ध्वभागे गणायेतु महाबलपराक्रमाः ॥ सुसूक्ष्मासाः सूक्ष्म
निभास्तथावै सूक्ष्मलोहिताः ॥ ८५ ॥ दिव्यांतरिक्षभौमाश्च पातालतलवासिनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिवपूजासमुत्पन्नाशुभनाशयंतुमे ।। १६ ।। एते गणा महात्मानो महाबलपराक्रमाः
।। शिवं संपूज्य यत्नेन बलिं तेषां विनिक्षिपेत् ।। १७ ।। ततः सुप्रीतमनसः शांतिं कुर्वन्तु मे स
दा ।। अमरावती नाम पुरी पूर्वभागे व्यवस्थिता ।। १८ ।। विद्याधरसमाकीर्णा सिद्धगन्धर्व
सेविता ।। रत्नप्राकारखचिता सर्वरत्नोपशोभिता ।। १९ ।। तत्र देवपतिः श्रीमान् वज्रपा
णिर्महाबलः ।। नेत्राणां तु सहस्रेण शोभनेन विराजते ।। २० ।। ऐरावतगजारूढो हेम
वर्णो महाद्युतिः ।। देवैः समन्ततं हृष्टः परमेशार्चनिरतः ।। शिवध्यानेन संपन्नः शिवभक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समन्वितः ॥ शिवप्रणामपरमः करोतु मम शांतिकं ॥ २३ ॥ आग्नेयो दिग्विभागेतु पुरीतेजो
वतीशुभा ॥ नानादेवसभाकीर्णा रत्नज्वाला समुज्वला ॥ २४ ॥ तत्रज्वालापरीताङ्गो
दीप्ताङ्गारसमद्युतिः ॥ भूतिक्लृप्तदेहिनां देवो ज्वलनः पापनाशनः ॥ २५ ॥ शिवपूजाजयो
युक्तः शिवस्मरणभावितः ॥ शांतिं करोतु मे देवस्तथा पापपरिक्षयं ॥ २६ ॥ वैवस्वतीना
मपुरी दक्षिणेन व्यवस्थिता ॥ गुणाढ्यशतानिकापि न्द्ररक्षोगणालया ॥ २७ ॥ तत्रेन्द्रनील
संकाशो रक्तायतलोचनः ॥ महामहिषमारूढः कृष्णस्त्रग्वरभूषणः ॥ अन्तकोऽथ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महातेजाः शिववर्म्म परायणः ॥२८॥ शिरूजा मम युक्तः क्षेमारोग्यं ददातु मे ॥ नैरृत्ये तु
दिशो भागे प्रोक्त ह्येतिविक्षता ॥२९॥ महारक्षोगणाकीर्णा पिशाच भूतसंकुला ॥ त
चजीमूतसंकाशो रक्तस्रग्वस्त्रभूषणः ॥१००॥ खड्गपाणिर्महातेजाः करालवदनोज्व
लः ॥ रक्षेन्द्रो नैरृत्यो नित्यं शिवार्च्चनरतः सदा ॥ करोतु मे महाशान्ति शिवभक्तिसमन्वि
कः ॥ पश्चिमेतु दिशो भागे परिभुक्तवती शुभा ॥ नाना गणसमाकीर्णा नानाकिन्नरशो
भिता ॥१०१॥ नवमौक्तिकसंकाशः पारिपिंगललोचनः ॥१०२॥ भुजङ्गवस्त्रपरिधानः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाशहस्तो महाबलः ॥ वरुणाः परया भक्त्या शिवैकाहितमानसः ॥ १०४ ॥ रोगशोकार्त्ति
संतापं नित्यं नाशयतु ध्रुवं ॥ वायव्यो दिग्विभागे तु पुरी गंधवती शुभा ॥ ऋद्धिसिद्धगणाढ्यु
प्या हेमप्राकारतोरणा ॥ तत्र नाम्नेण देहेन कृष्णपिंगललोचनः ॥ १०६ ॥ पटध्वजान्तराली
नो ध्वजयष्ट्यायुधो घनः ॥ पवनः परमो देवः परमेश्वरभावितः ॥ क्षेमारोग्यं बलं शांतिं
करोतु सततं मम ॥ महोदयानाम पुरी उत्तरेण महोज्वला ॥ अनेकयक्षसंकीर्णा नाना
रत्नोपशोभिता ॥ तत्र देवो गदाहस्तः श्विनस्त्र पवस्त्रभूषणः ॥ २ ॥ हस्त्रबाहुर्महातेजाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ शांति ॥
॥ ११ ॥

पारिपिंगललोचनः ॥ अवैरोवादध्यीमानहस्पादार्द्धनेरतः ॥ शांतिंकरोतुमेशांतःप्रीतश्री
नेनतेजसा ॥ यशोवतीपुरीरम्यास्येशानीन्दिशमाश्रीता ॥ नानागणसमाकीर्णानाना
सुरक्तनालया ॥ तेजःप्राकारपर्यन्तानिरोपम्यामहोदया ॥ १२ ॥ तत्रमौक्तिकशंका
शःश्वशशाङ्ककृतभूषणः ॥ त्रिनेत्रःशान्तरूपात्मा अक्षमालाधरोहरः ॥ ईशानःपरमोदे
वःसर्वदेवोनमोनमः ॥ सिद्धानांयोगिनांचैवसर्वदेवनमस्कृतः ॥ सोपिसर्वात्मभा
वेनशान्तिमाशुप्रयछतु ॥ भूर्लोकेयश्चवोलोकेस्वर्ल्लोकेनिवसन्तिये ॥ १३ ॥ देवा

॥ रामः ॥
॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिव्यप्रभायुक्ताः शांतिं कुर्वन्तु मे सदा ॥ महर्ल्लोके जनलोके तपोलोके स्थिताश्च ये ॥
१८ ॥ तेपि प्रमुदिता देवाः शिवं कुर्वन्तु मे सदा ॥ सत्यलोके च ये देवाः प्रभावोज्ज्वलाविग्र
हाः ॥ शिवभक्ताः सुमनसो भयं निर्नाशयन्तु मे ॥ गिरिकंदरदुर्गेषु वनेषु निवसन्ति ये ॥
१९ ॥ रुद्रार्चनपरा देवा रक्ष्यां कुर्वन्तु मे सदा ॥ सरच्चन्द्रप्रगौरेण देहेनामलतेजसा ॥
सरस्वती शिवे भक्ता शान्तिं मा करोतु मे ॥ चारुचामीकरच्छाया सरोजकरपल्लवा ॥
२० ॥ शिवभक्ता च या देवी श्री संभूतिं ददातु मे ॥ चारुणा मुखचन्द्रेणाविनिमकुमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोज्वला ॥२१॥ जयादेवी शिवे भक्ता सर्वकामं ददातु मे ॥ हारेणासुविचित्रेण भास्करोज्व
लतेजसा ॥२२॥ अपराजिता रुद्ररता करोतु विजयं मम: ॥ सिन्दूरारागरक्तेन वर्णेनाय
नलोचनः ॥२३॥ सहस्रकिरणः धीमान् सप्तसप्तिकवाहनः ॥ गभस्तिमाली भगवान्
शिवपूजापरायणः ॥२४॥ करोतु मे महाशान्तिं ग्रहपीडानिवारणं ॥ जगत्प्रपायनक
रोऽमृताधारः सुशीतलः ॥२५॥ सोमः सौम्येन भावेन ग्रहपीडां व्यपोहतु ॥ पद्मरागनिभो
देहः परिपिंगललोचनः ॥२६॥ अंगारकस्तु मे नित्यं ग्रहपीडां व्यपोहतु ॥ उत्तप्तमध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विदेहनचायो घनकरःसदा ॥ २७ ॥ शिवभक्तोबुधःश्रीमान् ग्रहपीडांव्यपोहतु ॥ धातु
चामीकरच्छायःसर्वज्ञानकनालय ॥ २८ ॥ बृहस्पतिःसदाकालमीशानार्चनतत्परः
॥ सोपिमेशान्तचित्तेनपरमेणसमाधिना ॥ ग्रहपीडांविनिर्ज्जित्यकरोतुविजयंसदा ॥
हिमकुन्देन्दुतुल्याभःसुरदैत्येन्द्रपूजितः ॥ शुक्रःशिवार्च्चनरतोग्रहपीडांव्यपोहतु
॥ भिन्नाञ्जनचयच्छायःसप्तनयनद्युतिः ॥ शनैश्चरःशिवभक्तोग्रहपीडांव्यपो
हतु ॥ नीलाञ्जननिभःश्रीमान्सोहिकेयोमहाबल ॥ ३२ ॥ शिवपूजापरोराहुर्ग्रह

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पीडांव्यपोहतु ॥ धूम्राकारोग्रहःकेतुरैशान्यादिशिसंस्थितः ॥३४॥ वर्तुलोनीलविस्ती
र्णलोचनैश्चवसुभीषणाः ॥ पलालधूमसंकाशोग्रहःपीडापहारकः ॥३५॥ घोरदंष्ट्रा
करालश्चकरोतुविजयंमम ॥ खड्गखेटकहस्तश्चवरपाणोवरदःशुभः ॥ शिवभक्तश्चाय
जन्मायग्रहपीडांव्यपोहतु ॥ एतेग्रहामहात्मानोमहेशार्चनभाविताः ॥ शांतिंकुर्वंतुमे
हृष्टाःसदाकालंहिनोग्रहाः ॥ मंगलापिंगलाधन्याभ्रामरीभद्रिकातथा ॥३६॥ उ
ल्कासिद्धासंकटाख्याकरोतुविजयंमम ॥ मुखेयस्याःस्थितामृत्युर्विषिर्नाममहाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ला ॥ ३९ ॥ सन्मुखेविघ्नकारी चपृष्ठेतुविजयंकरी ॥ तृतीयासप्तमीचैवदशमी चचतु
र्दशी ॥ ४० ॥ चतुर्थीत्वष्टमीचैवएकादशीतुपूर्णिमा ॥ एतेषुविघ्नपातेषुकृष्णेषु
त्केसमावहा ॥ अर्वन्तुमेलष्ववाः शांतिंचपरमेप्सिताम् ॥ अमावास्यामहापुण्यापि
तृदेवसमन्विता ॥ ४२ ॥ शांतिंचपरमांपुण्यांशिवस्यपरमात्मनः ॥ शिवतेजःसमा
युक्ताकरोतुममशांतिकां ॥ ४३ ॥ प्रतिपच्चमहाभागाद्वितीयाचमनोहरा ॥ तृतीयाच
तिथिःशान्ताचतुर्थीचमहायशा ॥ ४४ ॥ पंचमीनामशांतात्माषष्ठीचतिथिरुत्तमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥सप्तमीचतिथिःउग्रायास्त्वष्टमीचमहाबला॥४५॥ तिथिःभूलभूतश्चैवपापघ्ना परमा
स्मृता॥ नवमीतिथिरत्युग्रा उग्रायाःपरिकीर्तिता॥४६॥ दशमीशोभनाचैवतिथिरे
कादशीतथा॥ द्वादशीचैवशांतात्मातथातिथिस्त्रयोदशी॥४७॥ चतुर्दशीमहावी
र्य्यातिथिःशंकरात्मजा॥ पूर्णिमापरिपूर्णास्मातिथिर्वैसततोज्वला॥४८॥ सत
ततुभान्मानस्तिथयश्चक्रमेणातु॥ पक्षद्वयेसदाह्येतेचन्द्रगत्यांतगामिनः॥४९॥
शांतिंकुर्वंतुमेनित्यंशिवशक्तिविधायिनः॥ विष्कंभःप्रीतिरायुष्मान्सौभाग्यःशोभन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्तथा ॥ ५० ॥ अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ॥ गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो
हर्षणस्तथा ॥ ५१ ॥ वज्रः सिद्धिर्व्यतीपातो वरीयान् परिघः शिवः ॥ सिद्धिः साध्यः शुभः
शुक्लो ब्रह्मा ऐन्द्रश्चैव धृतिः ॥ ५२ ॥ चन्द्रस्य भानोश्चोत्पन्ना योगाश्चैते महावलाः ॥
शिवभक्तिपराः सर्वे शिवाज्ञानविधायिनः ॥ ५३ ॥ शान्तिं कुर्वन्तु मे नित्यं तथा किल्विषना
शनं ॥ कृत्तिका परमा देवी रोहिणी रुचिरानना ॥ ५४ ॥ श्रीमन्मृगशिरा भद्रा आर्द्रा च
परमोज्वला ॥ पुनर्वसुस्तथा पुष्य अश्लेषा च महावला ॥ ५५ ॥ नक्षत्रमातरो ह्येताः प्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भामालाविभूषिताः ॥ महादेवाङ्गनेसक्तामहादेवातभाविता ॥ ५९ ॥ पूर्वभागेस्थिताये
ताः शांतिकुर्वंतुमेसदा ॥ मघासर्वगुणोपेता पूर्वाश्चैवफल्गुनी ॥ उत्तरफाल्गुनीश्चै
वहस्ताचित्रातथोत्तमा ॥ स्वातिर्विशाखावाद्वादशिगास्थानसंस्थिताः ॥ अर्चयंती
सदाकालंदेवंत्रिभुवनेश्वरं ॥ नक्षत्रमातरोह्येतास्तेजसापरिभूषिताः ॥ ममापिशां
तिकंनित्यंकुर्वंतुशिववचोदिताः ॥ अनुराधातथाज्येष्ठामूलमहाद्भिवलान्वितम् ॥ ६० ॥
पूर्वाषाढामहावीर्याआषाढाचोत्तराशुभा ॥ अभिजिन्नामनक्षत्रंश्रवणःपरमोज्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लाः ॥ ६१ ॥ एताः पश्चिमतो दीप्ता राजन्ते राजमूर्त्तयः ॥ ईशानं पूजयन्त्येताः सर्वका
लं सुभाविताः ॥ ६२ ॥ मम शांतिं प्रकुर्वन्तु विभूतिभिः समन्विताः ॥ धनिष्ठा शतभि
षा चैव पूर्वभाद्रपदा तथा ॥ ६३ ॥ उत्तरभाद्रे रेवत्याश्विनी च महर्द्धिका ॥ भरणी च म
हावीर्य्या नित्यमुत्तरतः स्थिताः ॥ शिवार्च्चनपरा नित्यं शिवध्यानैकमानसाः ॥ शांतिं
कुर्वन्तु मे नित्यं सर्वकालं शुभोदयाम् ॥ ६५ ॥ मेषो राशिर्वृषः सिंहो धनुर्दीप्तिमत्ता
वराः ॥ पूर्वभागे वसन्त्येते शिवपूजापरायणाः ॥ ६६ ॥ शांतिं कुर्वन्तु मे नित्यं शिवभक्ति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परायणाः॥ वृषश्चकन्यादेवीचमकरश्चातिबुद्धिमान्॥ एतेदक्षिणभागेतुपूज
यंतिसदाशिवं॥ भक्त्यापरमयानित्यंशांतिंकुर्वंतुमेसदा॥ मिथुनश्चतुलाकुंभः
पश्चिमेनव्यवस्थिताः॥ शिवपादार्च्चनपराः क्षेमंकुर्वंतुमेसदा॥ ६९॥ कर्कटोवृश्चि
कोमीनएतेतूत्तरेणस्थिताः॥ पूजयंतिसदाकालंरुद्रंभुवननायकं॥ ७०॥ शांतिं
कुर्वंतुमेनित्यंशिवाज्ञाविधायिनः॥ बवश्चबालवश्चैवकौलवस्तैतिलस्तथा
७१॥ गरोवणिजस्थाविष्टिःशकुनिश्चचतुष्पदः॥ नागःकिंस्तुघ्नइत्येवंकरणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नीशभाविताः ॥ सर्वेष्वप्रीनमनसः शांतिं कुर्वंतु मे सदा ॥ जन्मसंपादिपञ्चे वक्षेम
प्रत्यरिसाधकाः ॥ वधमेचानिमैत्रं चासंन्येतेनारकागणाः ॥ शिवभक्त्याः सुमनसः
कुर्वन्तु मम शांतिकं ॥ ७४ ॥ ऋषयः सप्तविख्याताना क्रवाताः परमोज्वलाः ॥ शि
वप्रसादसंपन्नाः शांतिं कुर्वन्तु मे सदा ॥ ७५ ॥ काश्यपो गालवो गार्ग्यो विश्वामित्रो
महामुनिः ॥ मनुर्दक्षो वाशिष्ठो धर्मकण्डः पुलहः क्रतुः ॥ ७६ ॥ असितो बालखिल्य
श्च दुर्वासाः पिप्पलादकः ॥ ऋचिको भरतो गस्त्यो पाराशरो विभांडकः ॥ ७७ ॥ मातंगो जे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥शांतिः॥
॥१७॥

ऋनिर्व्यासो देवलो दर्भरोमकः ॥ मार्कण्डश्च दधीचिश्च मार्कण्डेयोथ गौतमः ॥ ७८
नारदो भृगुरात्रेयो भारद्वाजोङ्गिरा मुनिः ॥ वाल्मीकिः कौशिकः काण्वः शाकल्योथ पु
नर्वसुः ॥ ७९ ॥ शालंकायन इत्याद्या ऋषयो थ महाव्रताः ॥ शिवध्यानार्च्चनोद्युक्ताः
शांतिं कुर्वन्तु मे सदा ॥ ८० ॥ सिद्धाः संसिद्धतपसो गणाश्च विद्याधरादयः ॥ महात्मानो
महोत्साहा गरुडाश्च महर्द्धिकाः ॥ ८१ ॥ महेश्वरपरा ये ते महेशपादपूजकाः ॥ सि
द्धिमान् प्रयच्छन्त्वाशीर्वादपरायणाः ॥ ८२ ॥ नमुचिर्दैत्यराजेन्द्रः शंकरप्रेमि

॥राम॥
॥१७॥

17

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हावलः ॥ महानादोथविख्यातो दैत्यः परमवीर्यमान् ॥ हाङ्केश्वरदेवस्य नित्यं पूजा
परायणाः ॥ बलं वीर्यं च मे नित्यं प्रयच्छन्तु महर्द्धिकाः ॥ ८४ ॥ महाजम्भोह्यपीवेश्व
ह्लादोऽनुह्लादकः ॥ तारकोग्निमुखो दैत्यः कालनेमिर्महोत्कटः ॥ एते दैत्या महा
त्मानः शिवसद्भावभाविता ॥ ८५ ॥ पुष्टिं बलं तथा वीर्यं प्रयच्छन्तु सुखोदयं ॥ वि
रोचनो हिरण्याक्षः सुपर्वाकिसुलोमकः ॥ ८६ ॥ मकुकान्तकुक्रान्तुश्चैव दैत्यो रैवतक
स्तथा ॥ भावेन च परेणाब्जजयनेन सर्वदा शिवं ॥ ८७ ॥ सततं च महात्मानः पुष्टिं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुर्वंतु मे सदा ॥ आरक्तेन शरीरेण रक्तानायतलोचनः ॥ महाभोगकृताटोपः शंखवा
ज्वल्कृतलांछनः ॥ अनंतो नागराजेंद्रः शिवपादार्च्चनो रतः ॥ १९ ॥ महापापविष
हृत्वा शांतिमाशुकरोतु मे ॥ शुभ्रश्वेतेन देहेन शुभ्रश्वेतोत्पलशेखरः ॥ २० ॥ चारुभो
गकृताटोपश्चारुहारविभूषणः ॥ वासुकिर्नागराजेंद्रो रुद्रप्रजापरो महान् ॥ २१ ॥
महापापविषं हृत्वा शांतिमाशुकरोतु मे ॥ अतिपीतेन देहेन विस्फुरज्जोगसंपदा ॥
२२ ॥ तेजसा चातिदीप्तेन कृतस्वस्तिकलांछनः ॥ नागराट् तक्षकः श्रीमान्नागको

18

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घासमन्वितः॥२३॥ करोतु मे महाशांतिं सर्व्वदोषविषापहं॥ अतिकृष्णेन वर्णेन स्फु
टोविकटमस्तकः॥२४॥ कराठैरखात्रयोपेतो घोरदंष्ट्राउधोद्यतः॥ कर्कोटको
महानागो विषदर्प्यबलान्वितः॥२५॥ विषशस्त्राग्निसंतापं हत्वा शांतिं करोतु मे॥ प
द्मवर्णेन देहेन चारुरूपमायतेक्षणः॥२६॥ पंचविन्दुकृनाभासो ग्रीवायंसुभल्लक्षणः
रव्यातापभो महानागो हरपादार्च्चनेरतः॥२७॥ करोतु मे महाशांतिं महापापविषक्षयं
॥ पुण्डरीकनिभेनापि देहेनामिततेजसा॥ शंखशुभ्रोज्वलरुचिर्भूषितो मूर्द्धिस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्दा ॥ महापद्मो महानागो नित्यं पशुपतौ रत: ॥ २०० ॥ विनिर्हृत्य विषं घोरं शांतिमा
शु करोतु मे ॥ श्यामेन देहभारेण श्रीमत्कमललोचन: ॥ १ ॥ विषदर्पं बलोन्मत्तो
ग्रीवायामेकरेखया ॥ शंखपाल: श्रियादीप्त: शिवपादाब्जपूजक: ॥ २ ॥ महाविषं
महापापं हत्वा शांतिं करोतु मे ॥ अतिघोरेण देहेन चन्द्रार्कज्वलनमस्तक: ॥ ३ ॥ दीप्त
भोगफणाटोप: शुभ्रलक्षणलासित: ॥ कुलिको नागराजेशो नित्यं हरपरायण:
४ ॥ अपहृत्य विषं घोरं करोतु मम शांतिकं ॥ अंतरिक्षे च ये नागा ये नागा: स्वर्गसंस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ता॥ ५॥ गिरिकन्दरदुर्गेषु येनागाश्चविसंस्थिताः॥ पाताले ये स्थिता नागाः सर्वेप्य
त्र समाहिताः॥ ६॥ रुद्रपादार्च्चने सक्ताः कुर्वन्तु मम शांतिकं॥ नागिन्यो नागकन्याश्च
तथा नागकुमारिकाः॥ ७॥ शिवभक्ताः सुमनसः शांतिं कुर्वन्तु मे सदा॥ य इदं नागसंस्तवं
न कीर्त्तयेच्छृणुयादपि॥ ८॥ न तस्य सर्प्पा हिंसंति ना विषं क्रमते सदा॥ गङ्गा सु
रूपा महादेवी यमुना नर्मदा नदी॥ ९॥ गोमती तापिका वेरी वरुणा देविका तथा॥ सर्व
जनपतिं देवं परमेशं महेश्वरं॥ १०॥ पूजयंति महानघाः शिवसद्भावभाविता॥ शां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ शांति ॥
॥ २० ॥

तिं कुर्वन्तु मे नित्यं तथा पापपरिक्षयं ॥ सिद्धिमाशु प्रयच्छन्तु सर्वविघ्नविवर्ज्जिताम् चन्द्र
भागा महापुण्या पानदी गोदावरी शुभा ॥ १२ ॥ शरद्गण्डकी श्रेष्ठा कौशिकी च सरस्वती
स्तानघो महाभागाः शिवपादाब्जनिरता ॥ १३ ॥ शांतिं कुर्वन्तु मे श्रीनाः शिवध्यानैकमा
नसाः ॥ नैरञ्जना नाम नदी शोणा साभ्रावापी महानदः ॥ मन्दाकिनी च परमा तथा सन्नि
हिता शुभा ॥ सिप्रा विपाशा चन्द्रभागा लोहित्यश्च महानदः ॥ १५ ॥ महाप्रज्ञा तथा वेणी
तथा वैतरणी नदी ॥ स्नानाश्चान्याश्च बहवो भुवि दिव्यं तरिक्षगा ॥ १६ ॥ रुजा जनप

॥ राम ॥
॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रानघः कुर्वन्तु मम शान्तिकं ॥ महावैश्रवणो देवो यक्षराजो महर्द्धिकः ॥ यक्षकोटिप
रीवारो यक्षसंघेन संयुतः ॥ महाविभवसंपन्नो हरपार्श्वे निरतः ॥ हस्त्यानेक परमो
हरपादानतो नमः ॥ शान्तिकरोतु मे प्रीतः पद्मपत्रायतेक्षणः ॥१९॥ मणिभद्रो महाय
क्षो मणिरत्नविभूषितः ॥ मनोहरेणहारेणकराठलग्नेनराजते ॥२१॥ यक्षिणी यक्ष
कन्याभिः परिवारितविग्रहः ॥ रुद्रार्च्चनपरो यक्षः करोतु मम शान्तिकं ॥ सुवीर्यपक्षरा
जेन्द्रो मणिकाराठलभूषितः ॥ ललाटे हेमपटेन शोभने नाविराजते ॥२२॥ बहुयक्ष

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ शा·ति ॥
॥ २१ ॥

समाकीर्णो यक्षैर्न्नैमितविग्रहः ॥ शिवपूजापरो भक्तः करोतु मम शांतिकं ॥ २३ ॥ पाश्विको
नाम यक्षेन्द्रः कारिठकाकटकोज्वलः ॥ हारेणासविचित्रेणाकेयूराभ्यां विराजते ॥ २४
यक्षसंघैः समाउक्तो यक्षकोटिसमावृतः ॥ हरार्च्चनपरः श्रीमान्करोतु मम शांतिकं ॥
श्रीमान्विभाराडको यक्षो नानारत्नविभूषितः ॥ चारुणाउराडलेन्द्रेणाकर्णो नित्यं
विराजते ॥ २६ ॥ यक्षेश्वरो यक्षपतिर्यक्षसेनापतिर्ध्रुवः ॥ हरपादार्च्चकः श्रीमा
न्करोतु मम शांतिकं ॥ २७ ॥ धनाढ्यो महातेजा यक्षो यक्षाधिपः प्रभुः ॥ दिव्यपद्मं

॥ राम: ॥
॥ २१ ॥

21

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मुकुटन्नोमणिकाञ्चनभूषिता: ॥२८॥ चन्द्रसपन्नपट्टेनदेहेनापिविराजते ॥ य
क्षकोटिसहस्रैस्तु परिवारितविग्रहः ॥२९॥ शिवभक्तः शिवध्यानाशिवपूजापराय
णा॥ शिवप्रसादसंपन्नः करोतुमम: शांतिकं ॥३०॥ पूर्णाभिद्रोमहायक्षः सर्वालं
कारभूषितः ॥ रत्नप्रदीप्तपट्टेनहेमनानीवविराजते ॥३१॥ यक्षकोटिसहस्रेणप
रिवारेणसंयुतः ॥ रुद्रप्रणामपरमोरुद्रभक्तियुतः पुनः ॥ रुद्रार्चनसमायुक्तः
करोतुमम शांतिकम् ॥ विरूपाक्षश्चयक्षेन्द्रश्वेतवासामहाद्युतिः ॥३२॥ चारुकां

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चनवराभिः किंकिरीभिः समन्वितः॥ भूषितश्च सदा कालं वाराकनत्परः॥ रुद्रपूजा
परो भक्तः करोतु मम शांतिकं॥ अन्तरिक्षगता यक्षा ये यक्षाः स्वर्गवासिनः॥ ३५॥ गिरि
कन्दरदुर्गेषु ये यक्षा भूत[illegible]निवासिनः॥ अन्तरिक्षे च ये यक्षाः पातालतलवासिनः॥
३६॥ नानारूपा महाबला यक्षा नानावेषधरास्तथा॥ शिवभक्ताः सुमनसः शिवपूजासमु
त्सुकाः॥ ३७॥ शांतिं कुर्वन्तु मे हृष्टाः शांताः शांतिपरायणाः॥ यक्षिरूपा विविधाका
रास्तथा यक्षकुमारकाः॥ ३८॥ यक्षकन्या महाभागाः शिवपूजार्चने रताः॥ शांति

22

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वस्त्ययनंक्षेमंबलंकल्याणमुत्तमं ॥ सिद्धिश्चाऽप्रयच्छन्तुनित्यमेवसमाहिताः ॥ मे
रुर्मन्दरःकैलासोमलयोगन्धमादनः ॥४०॥ श्रीपर्वतोमहेन्द्रश्चहेमकूटस्तथैवच ॥
पर्वताःसर्वतःसर्वेपर्वताश्चमहर्द्धिकाः ॥४१॥ शिवभक्ताःसदाकालंक्षेमंकुर्वन्तुमेस
दा ॥ जम्बूद्वीपःप्लक्षद्वीपःशाल्मलिःकुशद्वीपकः ॥४२॥ क्रौञ्चद्वीपःशाकद्वी
पोगोमेदद्वीपकोमहान् ॥ पुष्करस्तुमहाद्वीपस्तेद्वीपामहारुच ॥ रुद्रभक्तिरताःस
र्वेशान्तिंकुर्वन्तुमेसदा ॥ क्षारोदकश्चक्षीरोदोदधिघृतोदएवच ॥४४॥ इक्षोदःस्वादु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दकास्त्वशङ्खउदकस्तथैवच ॥ सप्तसमुद्रनामानःकुर्वंतुममशांतिकं ॥४५॥ सागराःसरितः
सर्वाःसागराःसर्वतःस्थिताः ॥ रुद्रपूजापरानित्यंकुर्वंतुममशांतिकं ॥४६॥ राक्षसाःसर्वतः
सर्वराक्षसाघोररूपिणः ॥ राक्षसायेमहावीर्याराक्षसाश्चमहाबलाः ॥४७॥ स्थलस्थारा
क्षसायेतुअन्तरिक्षेतुराक्षसाः ॥ पातालेभूतलेयेचनित्यंरुद्रपरायणाः ॥४८॥ शांतिंकु
र्वंतुमेनित्यंसततंशिवभाविताः ॥ भैरवंयस्यरूपन्तुप्रेतभस्मावगुंठितं ॥४९॥ तेजसा
तस्यदेवस्यशांतिंकुर्वंतुमेसदा ॥ नित्यमुज्वलवेषाणायोगिन्योप्यमहाबलाः ॥ रूपिण्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विविधाकाराडाकिन्यश्च महर्द्धिकाः ॥ रुद्रप्रणामनिरता रुद्रपूजार्च्चने रताः ॥ ५१
रुद्रे काहि निचेतस्काः कुर्वन्तु मम शांतिकं ॥ अन्तरिक्षगता याश्च डाकिन्यः स्वर्गसंस्थि
ताः ॥ पाताले याश्च डाकिन्यो गिरिदुर्गेषु याः स्थिताः ॥ तृतीयं लोचनं यस्य विभ्र
त्वं भस्म भासुरं ॥ ५३ ॥ तेजसा तस्य देवस्य शांतिं कुर्वन्तु मे सदा ॥ सर्वभूता महारूपाः
सर्वभूता महोज्वलाः ॥ ५४ ॥ सर्वभूताः स्थिताः सौम्याः सर्वभूता मनोजवाः ॥ अन्त
रिक्षे च ये भूता दिवि संस्थिताः ॥ ५५ ॥ पाताले भूतले ये तु भूता भूति विशायकाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

खट्वांगं विमलं यस्य त्रिशूलं भस्म भासुरं ॥५६॥ तेजसा तस्य देवस्य शांतिं कुर्वंतु मे सदा ॥
प्रेताः प्रेतगणाः सर्वे ये प्रेताः स्वर्गवासिनः ॥५७॥ पाताले भूतले प्रेता ये प्रेताः कामरूपि
णः ॥ श्मशाने निलयो यस्य वृषभो यस्य वाहनः ॥५८॥ तेजसा तस्य देवस्य शांतिं कुर्व
न्तु मे सदा ॥ ये पिशाचा महावीर्याः क्रूराः क्रिमनो महाबलाः ॥५९॥ नानारूपधराः सर्वे
सर्वे चण्डगणवत्तराः ॥ अन्तरिक्षे पिशाचा ये स्वर्गे ये च पिशाचकाः ॥६०॥ भूपाताले पि
शाचाश्च बहुरूपा मनोजवाः ॥ चन्द्रार्द्धं मस्तके यस्य गङ्गा येन जटाक्षता ॥६१॥ ते

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जशानस्यदेवस्य शांतिं कुर्वंतुमे सदा ॥ अपस्मारग्रहाः सर्वे सर्वे चापि ज्वरग्रहाः ॥ ६२ ॥ ग
र्भबालग्रहश्चैव तु ना नारोग ग्रहाश्चये ॥ अन्तरिक्षे ग्रहा ये तु स्वर्गे ये तु ग्रहोत्तमाः ॥ ६३ ॥
भूपाताले ग्रहश्चैव तु ये ग्रहाः सर्वतो दिशः ॥ कण्ठे यस्य महानीलं भूषणं यस्य पन्नग ॥
६४ ॥ तेजसा तस्य देवस्य शांतिं कुर्वंतु मे सदा ॥ शक्तिदेवादयः सर्वे शिवज्ञानविधायिन
॥ ६५ ॥ कुर्वंतु जगतः शांतिं शिवभक्तेषु सर्वदा ॥ जयात्मयोगसंस्थाय जय संशुद्ध
चेतसे ॥ ६६ ॥ जय दर्शनकर्त्राय जयेशाय नमोस्तु ते ॥ जयोत्तमाय देवाय जयक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ शां·ति· ॥
॥ २५ ॥

ल्याणकारिणे ॥ ६७ ॥ जयप्रकटदेहायजयजप्यायतेनमः ॥ जयलक्ष्मीनिधानाय
जयकांतिविधायिने ॥ ६८ ॥ जयवाक्यविष्णुञ्जायअजितायनमोनमः ॥ जय
ज्ञानविष्णुञ्जायसर्वव्यापिन्नमोस्तुते ॥ ६९ ॥ जयशर्वपञ्जायवाङ्मूर्त्तेनमोन
मः ॥ जयत्रिभल्लहस्तायजयपरखट्वांगधारिणे ॥ ७० ॥ जयनिर्जितलोकायजयल
पायतेनमः ॥ जयकांतार्द्धदेहायजयचन्द्रार्द्धधारिणे ॥ ७१ ॥ जयाधारायसर्वाय
जयकर्त्रेनमोनमः ॥ जयमोक्षप्रदानायसृष्टिसंहारकारिणे ॥ ७२ ॥ ब्रह्मविष्ण्विंद्र

॥ राम ॥
॥ २५ ॥
25

वन्द्याय शिवशांतायते नमः ॥ इत्येवं शांतिकाध्यायं यः पठेच्छृणुयादपि ॥ ८३ ॥ सवि
धूयाशुपापानि शिवलोके महीयते ॥ कन्यार्थी लभते कन्यां जयकामो जयं लभेत् ॥
८४ ॥ अर्थकामो लभेदर्थान् पुत्रकामः सुतान्बहून् ॥ विद्यार्थी लभते विद्यां योगा
र्थी योगमाप्नुयात् ॥ ८५ ॥ यान्यान् प्रार्थयते कामान् मानवः श्रवणादिह ॥ तत्त
द्वशी ध्रुवमाप्नोति देवानामपि प्रियो भवेत् ॥ शान्त्यध्यायं पठन् पश्यन् संध्यामध्यविशेन्न
रः ॥ मनिर्जित्याहवे शत्रून् कल्याणैः परिपूर्यते ॥ ८६ ॥ अक्षयं मोदते कालमनिर

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ शान्ति ॥
॥ २६ ॥

रक्तशासनः ॥ व्याधिभिर्नाभिभूयेत तपञ्चपीञ्चप्रतिक्ष्मः ॥ ७८ ॥ पाठ्यमानमिदं पुण्यं
यमुद्दिश्य च पठ्यते ॥ न तस्य रोगा बाधन्ते वातपित्तादिसंभवाः ॥ ७९ ॥ नाकाले मरणं
तस्य न सर्पैश्चापि दश्यते ॥ न विषं क्रमते देहे न जडान्धत्वमूकता ॥ ८० ॥ नोपसर्ग
भयं तस्य नोत्पातस्य भयं भवेत् ॥ नाभिचारकृतैर्दोषैर्लिप्यते स कदाचन ॥ ८१ ॥ यत्पु
ण्यं सर्वतीर्थानां गंगादीनां विशेषतः ॥ तत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादि
ह ॥ ८२ ॥ यज्ञानां राजसूयानामग्निष्टोममहान्तस्य च ॥ श्रवणात्फलमाप्नोति कौ

26
॥ रामः ॥
॥ २६ ॥

॥ शांति ॥
॥ ७ ॥

टिकोटिशतोत्तरं ॥ ८३ ॥ अवध्यः सर्वभूतानामन्येषाञ्च विशेषतः ॥ जीवेद्वर्षशतं साग्रं
सर्वव्याधिविवर्जितः ॥ गोघ्नश्चैव कृतघ्नश्च ब्रह्मघ्नो गुरुतल्पगः ॥ शरणागतघाती च
मित्रविश्रम्भघातकः ॥ ८४ ॥ दुष्टपापसमाचारो मातृहापितृहा तथा ॥ श्रवणाद्दश
भागेन मुच्यते सर्वपातकैः ॥ ८५ ॥ शान्त्याध्यायमिदं पुण्यं न देयं यस्य कस्यचित् ॥ शि
वभक्ताय दातव्यं शिवेन कथितं पुरा ॥ ८६ ॥ इति शिवधर्मशास्त्रे नन्दिकेश्वरप्रणीते
शान्त्यध्यायः षष्ठः ॥ शुभम् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ राम: ॥
॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नं. ४२२१

व्यासः

सनत्कुमार संहितायां

कार्तिकमाहात्म्यः कार्तिकमाघत्म्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विभूषणाः॥ ज्ञानमुद्राकरे विभ्रन्ध्याननिमि[redacted]मितलोचनः॥ ११ ॥ द्वितीयो राजसो जातो दंडपुस्तकधारकः॥ दाता वदा
न्यः शूरस्थ्वकुलजातिविभागहृत्॥ १२ ॥ तृतीयस्तामसो होता प्रणीता पशुधारकः॥ पठन्वेदगीतं नृत्यकरलोकैः
समाहृतः॥ १३ ॥ चतुर्थो मदिरोन्मत्तः कराभ्यां लिंगपीडकः॥ स्कंधयोर्दत्तयुवतिर्हास्यघूर्णितलोचनः॥ १४ ॥ सू
 र्य उवाच॥ ॥ एतान्पश्यतु मे धीराः कारणं मे गतेः किल॥ उत्पत्तिस्थितिनाशाय सर्वेषां पर्यटाम्यहम्॥ १५ ॥ इ
त्युक्ता भास्करस्तूर्णं मेदिनीतां व्यगाहत॥ ब्रह्माद्याः परिपप्रच्छुः हृतं ज्येष्ठं शनैः शनैः॥ देवा ऊचुः॥ ॥ कथं श्रीभा
स्करगतिः कथं कालांशको भवान्॥ क एष वेषः किं कार्यं त्वया तत्तूर्णं प्रचालितं॥ १६ ॥ हृत उवाच॥ पां ॥ तं स्तो
१७२८००० सि यदारभ्य ब्रह्मन्नाद्दिवसादितः॥ प्रवृत्तैकसप्तलक्षं द्व्ययुतं चाष्टसंख्यकं॥ १८ ॥ सहस्रसौरवर्षाणि प्रयातेन तु (
मया जनाः ध्यानायनपसे ज्ञानमोक्षसाधनकर्मणि॥ १९ ॥ मयि नास्ति नरः कोपि स्वल्पायुश्चिनयान्वितः॥ ब्रह्म
निष्ठा नराः सर्वे रविमंडलभेदिनः॥ त्रेतोवाच॥ ॥ एतस्माद्युतरथाहं त्रेतानाम महाबलः॥ नृणां सुखंकरो ८

श्रीगणेशाय नमः॥ ॥अथ सनत्कुमारसंहितायां वालखिल्यार्कसूर्य्यान्तगणसंवादे कार्त्तिकमाहात्म्यं लिख्यते ॥ अथ पप्र
च्छुः॥ मुनिश्रेष्ठा वालखिल्याः सर्वलोकहितेच्छया॥ कलौ कलुषचित्तानां लोकानां दीनभाषिणां॥ १॥ ज्ञानविज्ञानहीना
नां शिश्नोदरसुखैषिणां॥ क्षणभंगुरबुद्धीनां स्वार्थतत्परचेतसां॥ २॥ कथं प्रसन्नो भगवान् भविष्यति जनार्दनः॥ श्रुतं वे भास्करमु
खान्नद्य तद्व्रतमुत्तमं॥ ३॥ न स्थिरं जायते वित्तं क्षणमात्रं जपादिषु॥ वाह्यपूजासमर्था नाश्रद्धारायसुखाय च॥ ४॥ इहलोके प
रत्रापि येन पुण्यमवाप्यते॥ वालखिल्या ऊचुः॥ सम्यक्पृष्टं मुनिवरैः कलिवुद्धिप्रभंजिनाः॥ ५॥ विचरंति नरा
मूढा नानामार्गोपसेवकाः॥ तेषामर्थे भास्करेणाप्रोक्तं व्रतमनुत्तमं॥ ६॥ भास्कर उवाच॥ शृणवन्तु भो भवन्तोपि वालखि
ल्याश्च नारद सनकाद्या भवन्तोपि शृणवन्तु व्रतमुत्तमं॥ ७॥ मतरिभ्रमणे नैव जायते सचराचरं तेनैव वृद्धिमायाति जा
यते तर्हि तितनतः॥ ८॥ व्रह्मविष्णुमहेशाद्यैरेकदा प्रार्थितस्त्वहं॥ कथं तव गतिज्ञानं जायते तद्वद प्रभो॥ ९॥ एवं तैः प्रा
र्थ्यमानोहं हृताः स्वांगांशसंभवाः॥ चत्वार एव पुरुषा युगरूपा महोज्ज्वलाः॥ १०॥ तत्राद्यः सात्विकः श्वेतवस्त्रमाल्य

राम

खमे२ १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्येद्व त्रिलोपेवमद्यमांसादिभक्षणे॥ ३२॥ मयित्वल्पायुषोलोकावहुधाविधवांगनाः॥स्वर्वैलोकाजारजाताः शिश्नोदरपरा
यणाः॥ ३३॥वाममार्गरतामातृभगिनीभोगकारकाः॥वाईकेवहुधासर्वेनिर्धनारोगसंयुताः॥ ३४॥ ब्राह्मणाः शूद्रकर्मा
णाःशूद्राब्राह्मणाहन्तयः॥युद्धकूटाः सर्वजनाःपतिंत्यक्ष्यंतिसंगरे॥ ३५॥स्वल्पेनहेतुनानार्योभर्तृत्यागविधायकाः
॥जातिवंध्याकाकवंध्यामृतवंध्याभवंतिच॥ ३६॥विद्यालक्ष्मीकलाद्याश्चनीचेष्वेवरमंतिच॥ दासीभोगरतालो
कापरित्यज्यकुलस्त्रियम्॥ ३७॥एवंधर्म्मंकरिष्यामिभ्रान्तधर्म्मविनाशकं॥एतन्ममस्वरूपन्तुयोजानातिसपंडि
तः॥३८॥सर्वधर्मपरित्यक्तंमांजानीतयुगंकलिं॥ ॥देवाऊचुः॥ ॥कलेतवसमोनास्तिकश्चिच्चित्रविमोहकः
॥ ३९॥किंचिद्व्रतंवादानंवायेनमुक्तोभवेन्नरः॥कृपांकृत्वावदक्षिप्रंविष्णुलोकंव्रजेद्यथा॥ ४०॥ कलिरुवाच
॥ ॥श्रनूतवदताप्रोक्तंभास्करेणश्रुतंमया॥ मय्यपिस्वर्गगमनंकारणंभूयतांतु तत्॥ ४१॥सूर्यउवाच॥ ॥द्वाद
शानांतुमासानांमार्गशीर्षेऽतिपुण्यदः॥तस्मात्पुण्यफलःप्रोक्तोवैशाखेनर्मदाजले॥४२॥ ततोलक्षगुणःप्रोक्तःप्र(

ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का. त्र्य. यंनं भ्रान्तधर्मविनाशकः॥ २१॥ मया वर्णाव्यवस्था च जातिभेदाः पृथक् पृथक्॥ उत्पादिता राजनीतिः सौख्यानि विविधा
२ नि च॥ २२॥ उच्चावचास्तथा धर्मा भ्रान्तधर्मविनाशकाः॥ प्रभुत्वे केह्विलक्षं च नवसंख्याः श्रुतानि च॥ २३॥ षट्सहस्रा(१२९६०००
णि मे मानं वृद्धिसंप्रीणणम्यह॥ ॥द्वापर उवाच॥ ॥शृणु त्वं देव मद्वाचो युगानामुत्तमं युगं॥ द्वापरं नाम विख्यातं ना
८६४००० नासौख्यप्रदायकं॥ चतुःषष्ठिसहस्राणि अष्टौ लक्षं तथैव च॥ २५॥ अहं वृद्धिं प्रयामि सर्वे पात्रसुखहेतवे॥ जैमिने
स्तु स्वरूपेण कर्ममार्गप्रकाशितः॥ २६॥ वर्णभेदः कृतो भ्रात्रा नमेषां जीवने विधिः॥ विचारितस्तु तेनातो मया धर्मः
प्रकाशितः॥ २७॥ तामसाश्च भविष्यंति मयि भूपाः सहस्रशः॥ अन्योन्यं ते शिरश्छेदाद्यास्यंति विलयं ध्रुवम्॥ २८
ज्येष्ठो ३ ॥ भ्रातृणां चैव सर्वेषामहं श्रेष्ठोस्मि देवताः॥ ॥कलिरुवाच॥ ॥हा धिक् कष्टं कृतं भ्रातृभिः प्राप्य ते कथं॥ २९
त्र्य२ ॥ मन्माहात्म्यमजानद्भिरज्ञानाद्बुद्धिवर्जितैः॥ एतद्धर्मैर्विहीनोहं कलिः सत्यविवर्जितः॥ ३०॥ अंशुतं च चत्वर्लक्षं सह राम २
स्रद्वितयं तथा॥ मत्कालपरिमाणं तु प्रेरयामी दृशीधियं॥ ३१॥ परस्त्रीगमने द्यूते चौर्ये दुष्मनिकूटके॥ पैश्न्य(२

कलि ३ ४३२०००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्त्तव्यंकार्त्तिकस्नानंसर्वपापापनुत्तये॥ सूर्य्यस्याभ्युदितेकार्य्यंतुलासंस्थेदिवाकरे॥ ४॥ ईषपूर्णासमारभ्ययावत्का
र्त्तिकपूर्णिमा॥ तावत्स्नानंविधातव्यंशिवसन्तुष्टयेनरैः॥ ५ ॥ देवीपक्षंसमारभ्यमहारात्रिचतुर्द्दशी॥ तावत्स्नानंवि
धातव्यंदेवीसंप्रीयतामिति॥ ६॥ देवीपक्षंसमारभ्यप्रत्युत्सर्यकार्त्तिकेभवेत्॥ चतुर्थ्यांतावद्देवस्यात्स्नानंगणप
तुष्टये॥ ७॥ एकादशींसमारभ्यस्याश्विनस्यासितेनरः॥ एकादश्यांकार्त्तिकस्यशुक्लायांपरिपूर्यते॥ ८॥ तेनन
व्रतंतुस्यस्यात्परितुष्टोजनार्द्दनः॥ नकार्त्तिकसमोमासोनकाशीसदृशीपुरी॥ ९॥ नप्रयागसमंतीर्थंनदेवः
केशवात्परः॥ प्रसंगाद्वाबलात्कारैर्ज्ञात्वाज्ञात्वाकृतंभवेत्॥ १०॥ स्नानंकार्त्तिकमासस्यनपश्येद्यमयातनां॥ स्ना
नार्थंचेत्त्वसामर्थ्यंदत्वान्यस्मैधनादिकं॥ ११॥ स्नानस्यतस्यहस्तस्यग्रहणात [redacted] पुण्यभाक्भवेत्॥ अथवाकार्त्ति
कस्नानयेकुर्वंतिद्विजातयः॥ १२॥ तेषांप्रावरणंदत्वास्नानजंफलमाप्नुयात्॥ राधादामोदरःपूज्यःकार्त्तिकेत्व
विसेषतः॥ १३ ॥ स्वर्णस्यवाथरूप्यस्याप्यभावेधुल्वजामपि॥ मृण्मयांवाचित्रजांवाथपिष्टजांचविचित्रितां॥ १४॥

लो१

ये४ ते३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चतुःपदार्थदातत्वात्पूर्जस्नानंगुरुस्मृतम्.२

का.म्. ३ यागेमाघमासकः॥तस्मान्महाफलंप्रोक्तःकार्त्तिकेजलमात्रके॥४३॥एकतःसर्वदानानितीर्थानिनियमास्तथा॥एकतः
कार्त्तिकस्नानंब्रह्मणातुलयाधृतं॥संततिश्चैवसंपत्तिःकलौयेषांप्रदृश्यते॥अवश्यंतैःकृतंविद्धिकार्त्तिकस्नानमादः
रात्॥४५॥स्नानंचदीपदानंचतुलसीवनपालनं॥भूमिशय्याब्रह्मचर्यंतथाद्विदलवर्जनम्॥४६॥विष्णुसंकी
र्त्तनंसत्यंपुराणश्रवणंतथा॥कार्त्तिकेमासिकुर्वन्तिजीवन्मुक्तास्तएवहि॥४७॥नकार्त्तिकसमंधर्म्ममर्थन्नोकार्त्ति
कात्परं॥नकार्त्तिकसमंकाम्यंमोक्षंदंनचकार्त्तिकात्॥४८॥युधिष्ठिरेणधर्मार्थमर्थार्थंचकुबेरेण॥श्रीकृष्णेन
तुकामार्थंमोक्षार्थंनारदेनच॥४९॥कृतमेतद्व्रतंतस्मात्केशवस्यप्रियंवहि॥५०॥ ॥इतिश्रीसनत्कुमारसं
कार्त्तिकमाहात्म्ये३ हितायांप्रथमोध्यायः॥१॥श्रीकृष्णउवाच॥ ॥ब्रूहिभास्करसर्वात्मन्कदारभ्यव्रतंकृतं॥सफलंजायतेसम्यक्क्र राम. २ 3
वेपूजाचदेवता॥१॥सूर्यउवाच॥ ॥अहंविष्णुश्चशर्वश्चदेवीविघ्नेश्वरस्तथा॥एकोहंपंचधाजातोनानाघेस्तू
त्रधोदयथा॥२॥अस्माकंसर्वएवैतेभेदाविद्धिखगेश्वर॥तस्मात्सौरेश्चगाणेशाःशाक्ताःशैवाश्चवैष्णवाः॥३॥

वत्ता१

महादुर्गंधयुक्तोपि गणार्वृक्षांस्तु सेव्यते ॥ २६ ॥ यथाश्वत्थो नमस्यस्तथा द्विजाः पूज्याः प्रयत्नतः ॥ रुद्रशापवशाज्जातो विष्णुम
क्षणान्नराः ॥ २७ ॥ तथापि ताः पूजनीयालोकद्वयफलप्रदाः ॥ ब्रह्मबीजेष्वपि श्रेष्ठः कृतोपनयनस्तु यः ॥ २८ ॥
तस्मादपि श्रेष्ठतरो यः सावित्रीजपेद्रसौ ॥ तस्माच्छ्रेष्ठतरः संध्यां यः करोति द्विजोत्तमः ॥ २९ ॥ ततोधिकतरो ज्ञेयो
यः स्नानं कुरुते द्विजः ॥ उत्कृष्टस्तु ततो ज्ञेयो यस्मात्स्वाचारेण संयुतः ॥ ३० ॥ ततोप्यधीतशास्त्रस्तु वेदवेत्ता ततोपि च
वेदार्थवेदवेत्ता च सदाचारपरायणाः ॥ अपरान्नरुचिः स्वस्त्रीनिरतः स्वोदयेन तथा ॥ मध्याह्ने प्रयतः संध्यां यः करो
ति द्विजोत्तमः ॥ ३२ ॥ अयाचितव्रतो होमी देवब्राह्मणपूजकः ॥ विभज्याशी सत्यवादी द्विजो यत्र तु तिष्ठति ॥ ३३ ॥
कलि कालोपसर्गाद्यास्तत्स्थले न विशंति च ॥ तस्मात्सर्वप्रयत्नेन कार्तिके द्विजमर्चयेत् ॥ ३४ ॥ दरिद्रो दानपा
त्रं स्यात् विद्यावांस्तु विशेषतः ॥ मोक्षायेकाकिने दद्याद्दानं ऽयभुताय च ॥ ३५ ॥ सपत्नीकाय धर्मार्थं विशेषणा
कुटुंबिने ॥ यत्सेवाकारिणा दत्तं दत्तं वार्द्धुषिकाय च ॥ ३६ ॥ दासीभार्यस्य च यद्दत्तं यद्दत्तं मांसभक्षणा ॥ तीर्थप्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दामोदरस्यराधायास्तुलस्याधोर्द्ध्वंयेनिये॥मूर्त्तिनैतेनराज्ञेयाजीवन्मुक्तोनसंशयः॥१५॥अपिपापसहस्राढ्यःकार्त्तिक
स्नानतोनरः॥सर्वरूपमुक्तोभवतिनात्रकार्याविचारणा॥१६॥कृतंयैःकार्त्तिकेमासिदीपदानंविधानतः॥इहरूपतेयेर
त्नभाजस्तेनयेवप्रकीर्त्तिताः॥१७॥योवृंदाभ्यासिनेदद्याद्दीपार्थेतैलमादरात्॥कोवातस्यफलंवक्तुंभुविनिष्ठति
मानवः॥दीपदानासमर्थश्चेत्परदीपंप्रबोधयेत्॥तुलस्याभावेकर्त्तव्यापूजाधात्रीतलेखग॥१८॥पूजासुरविविधा
नंतुकर्त्तव्यंसूर्यमंडले॥अप्रत्यक्षाःसर्वदेवाःप्रत्यक्षोभगवानयं॥२०॥सर्वेषामेवनेत्रोयंजगज्जीवयतेमृतं
॥एतदंशसमुद्भूताःरुद्राद्याःसर्वदेवताः॥२१॥प्रत्यक्षोभगवानेषश्चतुर्वेदेषुगीयते॥सर्वेदेवाःकालवशाःकाल
कालोदिवाकरः॥२२॥एतस्यमंडलेपूज्याःसर्वेदेवाःप्रयत्नतः॥एतदाराधनेशक्तःप्रतिमांपूजयेन्नरः॥२३॥प्र
तिमातोधिकंप्राप्यंब्राह्मणास्यतुपूजने॥अविद्योवासविद्योवाब्राह्मणोमामकीतनुः॥प्रायःकलियुगेविप्राःशू
द्राचारपरायणाः॥वाममार्गरताःप्रायःसंध्यास्नानविवर्जिताः॥२५॥ईदृशाअपितेपूज्याब्रह्मबीजसमुद्भवाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्स्वयंतुउंजीतनश्रीत्नस्मस्पंव्रजेत्॥ ४८ ॥शालग्रामशिलाचक्रेसद्वासंनिहितोहरिः॥तस्मात्सर्वप्रयत्नेनशाल
ग्रामंप्रपूजयेत्॥ ४९॥ ॥इतिश्रीसनत्कुमारसंहितायांकार्त्तिकमाहात्म्येद्वितीयोध्यायः॥२ ॥ऋषयऊचुः
॥ ॥शिवस्यकिंकृतंगोभिःशप्तास्ताःकेनहेतुना॥उत्कंठाजायतेस्माकंवालखिल्याब्रुवंततत॥ १॥ ॥वा
लखिल्याऊचुः॥ ॥एकदाहंसमाहृत्यविधातासमुपागतः॥कृत्वाचतुर्विधांसृष्टीतत्कौतुकसमुत्सुकः॥२॥
पश्यन्हिमाचलंदिव्यंनानाशृंगसमन्वितं॥गंगादिकसरिद्भिश्चपूज्य [redacted] मानमितस्ततः॥ ३॥नानाऋषि म्राव्य ५
गणाकीर्णंसिद्धगंधर्वसेवितं॥पक्षिणांकलनिर्ह्रादैर्मोहयंतंश्रुतिद्वयं॥ ४ ॥नानापक्षिगणाकीर्णमगम्यं
वकाचिद्धिमात्॥क्वचिद्दुडप्रियंविभ्रद्भिर्मनहरिंतंक्वचित्॥ ५ ॥मेघसंसर्गतःश्यामंक्वापांव मेघजांतथा॥पश्य
न्सकौतुकंदिव्यंगंगाद्वारमुपागमत्॥ ६॥ तत्रोपश्यद्दषीन्सर्वान्कार्त्तिकस्नानतत्परान्॥विष्णुभक्तिपरान्श्रेष्ठा
न्राधादामोदरार्च्चकान्॥ ७ ॥वासुदेवजगन्नाथहरेविष्णोजनार्दन॥इत्यादीनामब्रुवतोदृष्ट्वाकोपसमन्वि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निया हि गोचयद्दत्तं तीर्थभोजिने ॥ ३७ ॥ धनुर्दानाय यद्दत्तं यद्दत्तं व्रतभोजिने ॥ वेदविद्याजीवने च तथा नक्षत्रसूचिने
॥ ३८ ॥ ईदृशे दीयते दानं येनासौ नरकं व्रजेत् ॥ सर्वत्र पूजयेद्विप्रं सपत्नीकं द्विजो त्तम ॥ ३९ ॥ विप्राभावे पूज
नीया गावः कृष्णमनोहराः ॥ कपिला गोषु च श्रेष्ठा तदभावे च पिंगला ॥ ४० ॥ तदभावे सिता पूज्या सर्वाभावे च सिते
तरा ॥ तदभावे तु या काचिद्देवगृही वत्सेन संयुता ॥ ४१ ॥ विष्णोर्मूर्त्तिर्जंगमा तु स्थावरा तु प्रशस्यते ॥ श्रद्धस्थापि
तमूर्त्तीनां न नमस्कारं करोति यः ॥ ४२ ॥ पितृभिर्निरयं याति दशपूर्वैर्दशापरैः ॥ श्रद्धार्चितस्य संस्पर्शाद्दहेदास
प्तमं कुलं ॥ ४३ ॥ तस्माद्विचार्य विप्रैर्या स्थापिता तां समर्चयेत् ॥ ततो पि या देवताभिः कृता सा भुक्तिमुक्तिदा ॥
४४ ॥ मूर्त्त्यभावे पूजनीया ह्यश्वत्थो वा वटोथवा ॥ कार्त्तिके तुलसीशाकं नाबूलं वा नराधमः ॥ ४५ ॥ अज्ञाना
ज्ज्ञानतो वापि भुंजानो निरयं व्रजेत् ॥ धात्रीछायातले येन सकृद्भुक्तं तु कार्त्तिके ॥ ४६ ॥ दंपती भोजने दत्तमन्त्रदो
षात्प्रमुच्यते ॥ संपूर्णा कार्त्तिके यस्तु संपूज्यामलकीं शुभां ॥ ४७ ॥ राधादामोदरप्रीत्यै भोजनीये च दंपती ॥ पश्चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कथंपूज्योभविष्यति॥ ॥विष्णुरुवाच॥ ॥देवदेवमहादेवसदाधर्मासनस्थित॥ १७ ॥कःश्रेष्ठस्त्वावयोर्मे
ध्ये सत्यंब्रूहिजगत्पते॥ ॥शिवउवाच॥ ॥एतन्ममममहालिंगंकियदूर्ध्वंतलेकियत्॥ १८ ॥योज्ञास्यति
तदंतंसलोकेपूज्योभविष्यति॥तस्मादेकतरयाहित्वंब्रह्मन्विष्णोत्वमेकतः॥ १९ ॥एतद्वचःसमाकर्ण्यवे
धास्त्वोपरिसंययौ॥स्वधश्चगतोविष्णुर्ययौपंचशतंसमाः॥ २०॥विश्रांतःखेदखिन्नश्चनप्राप्तोन्तस्तुतस्य
वा॥पुनःपराहृत्यययौप्रणामनरुद्रमादरात्॥ ॥रुद्रउवाच॥ २१ ॥कथमंतोस्तिलिङ्गस्यकथ्यतांमधु
सूदन॥कियद्भिर्दिवसैःप्राप्तःकिंचिन्हमत्रवर्त्तते॥ २२ ॥विष्णुरुवाच॥ ॥खेदखिन्नोस्मिभगवन्गतो
पंचशतंसमाः॥सप्तपातालउड्डिघ्यतथाब्रह्माण्डगोलकं॥भास्करस्यान्तयोनास्तिततोप्यग्रेगतोस्म्यहं॥ते
जोरूपस्यलिंगस्यपारःप्राप्तोमयानतु॥इतिश्रुत्वावचस्तस्यतूष्णींभूयशिवःस्थितः॥ २४ ॥ब्रह्मावर्षमह
स्राणिययावूर्ध्वंसुदुःखितः॥विचारयन्मनस्येवंकिंकर्त्तव्यंमयाधुना॥ २५ ॥विष्णुनान्तोयदाप्राप्तस्तदा

व्यव २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का·मा·
ही

इह
त:॥ ८॥ब्रह्मोवाच॥ ॥अहोदुर्बुद्धिताकस्माद्भवतांसमुपस्थिता॥पितामहंपरित्यज्यकोत्रदेवउपास्यते॥ ९॥अहं
सर्वस्यजगतःकर्त्तामांत्यज्यभूतले॥आराध्यतेतद्वदध्वंनोचेच्छापंदास्यहं॥ १०॥वसुंधराभवन्तश्चनाशनी
यामयाध्रुवं॥ ॥वालखिल्याऊचुः॥ ॥इतिब्रह्मवचःश्रुत्वात्रस्तास्तेऋषिसत्तमाः॥ ११॥ध्यायंतश्चेतसावि
ष्णुंप्रत्यक्षोभूज्जनार्दनः॥विष्णुरुवाच॥ ॥निमित्तमात्रंत्वंब्रह्मन्विश्वस्यास्यतुपालकः॥नारायणःसोत्रवि
प्रैःपूज्यतेकार्त्तिकेसदा॥ १२॥ ॥ब्रह्मोवाच॥ ॥अहंपितामहःसाक्षाद्विश्वकर्त्ताजगद्गुरुः॥पूज्योस्मिसर्व
लोकानांवेदानामितिसंमतं॥ १३॥ ॥वालखिल्याऊचुः॥ ॥एवंतयोर्विवदतोर्नकस्यापिपराजयः॥त
दाविष्णुरुवाचेदंब्रह्मन्शृणुवचोमम॥आवयोर्यस्त्वमाहात्म्यंसामर्थ्यंयत्तदावयोः॥ १४॥महेशोवेत्तियत्त
त्वं=।तत्र=
त्रगत्वान्यायोःश्रुवावयोः॥ब्रह्मणापितथेत्युक्तेजग्मतुःकाशिकांप्रति॥ १५॥प्रणिपत्यमहादेवंब्रह्माव
चनमब्रवीत्॥ ॥ब्रह्मोवाच॥ ॥देवाकर्णायविश्वस्यकर्त्ताहंचपितामहः॥ १६॥मदाज्ञानुचरोविष्णुः

6
राम
ही

प्रभावेन विधवा न भविष्यति॥ तस्य त्वापि तयेत्युक्तं प्रायश्चित्तं सदन्नवान्॥ ३०॥ किशोर्य्यै वैष्णवं धर्म्मं समयं वादिदेशसः॥ द्विजे
नतेन यद्दत्तं किशोर्य्यपि तथाकरोत्॥ ३१॥ वर्षत्रय यथाशास्त्रं किशोर्य्या तद्व्रतं कृतम्॥ चतुर्थे कार्त्तिके मासि किशोरी स्नापनाय
च॥ ३२॥ प्रातःकाले गता बाला दृष्टा मार्गे विलेपिना॥ क्षत्त्रियेन यदा दृष्टा प्राप्य मोहं जडात्मकः॥ दृष्टे तस्यास्तु संलग्नो भावयन्त्रा
मनिंदितां॥ केचित्तां दद्दभुर्दूरात्केचित्स्पर्शन्ति गुप्तकः॥ ३३॥ स्त्रियोपि तां प्रपश्यन्ति पुरुषाणां तु का कथा॥ यथा द्वितीया चन्द्रस्य
दर्शने चोत्सुका जनाः॥ ३४॥ तथा तां वीक्षितुं तत्र द्वारे सकला जना॥ निमेषमात्रमर्केण दृष्टा स्थित्वा तु बालिका॥ ३५॥ अधिकं
किं वर्णनीयं तस्यौ दर्य्यं मुनीश्वराः॥ केचिद्वदन्ति देवीयं नागकन्येति चापरे॥ ३६॥ रुद्रसंमोहनार्थाय जाता सा मोहिनीति च॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.मा.
४५

नकाभिधः॥धनाढ्यो वैश्यपत्निश्च वैभवो राजपूजितः॥१३॥ बहुकालो गतस्तस्य विना पत्यं मुनीश्वराः॥ ततो नानाव्रतैर्जाता कन्या कमल
लोचना॥१४॥ रूपलक्षणोपेता नानागुणसमन्विता॥ पिता तस्या नाम चक्रे किशोरीति विविश्रुतं॥१५॥ एकदा तत्र देयातो जन्म
पत्रीनिरीक्षकः॥ दर्शयित्वा जन्मपत्रीं कथं कन्या भवान्विदं॥१६॥ ततस्तेन क्षणं ध्यात्वा कनकं श्रूयतामेव वचः॥ यदि त्वं वीमि सत्यं वै
त्वं दुःखं भविष्यति॥ यद्यसत्यमहं ब्रूयां मिथ्यात्वं मम जायते॥ तस्मात्सत्यं वदिष्यामि यज्ञोचितं तथा कुरु॥१८॥ अस्याः करग्रहं
कुर्याद्यः सौ वर्षान्मरिष्यति॥ इति तद्वचनं श्रुत्वा कनको दुःखितो भवत्॥१९॥ नचकार विवाहोस्याः सा च बाला तरा पजने॥ नियुक्ता
स्य गृहे दत्तेनानेयामसुखाप्रतः॥२०॥ दृष्ट्वेमां रूपसंपन्नां दुःखमेवाधयिष्यति॥ स्थितान्यस्मिन्गृहे सात्र द्विजातिथ्यमचीकरत्॥
२१॥ कदाचिद्दैवयोगेन तत्रागाद्द्विजपुंगवः॥ यात्रार्थं विष्णुकांच्यायां वैशाखे मासि शंकरः॥२२॥ हेमको विप्रशुश्रूषां ज्ञात्वा
त्रैवसमागतः॥ आरात्यां गृहमध्ये तु उपविष्टो द्विजोत्तमः॥२३॥ किशोर्यागत्य चातिथ्यं शंकरस्य कृतं तदा॥ दृष्ट्वा तां तरुणीं त
न्वांसु वेषां विनयान्वितां॥२४॥ अज्ञातकरपीडां च सखीं दृष्ट्वाब्रवीत्स सः॥ ॥शंकर उवाच॥ ॥चन्दनेव दर्शीपुं त्वं किशो

४४
राम
४५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परायण॥ ५० ॥ किशोर्याः श्रुश्रुतास्तेन वार्त्तेयमतिसुन्दरा॥ तदा तेन मुकुन्देन संकल्पः कृतस्तु वहि॥ किशोरी यदि भार्या मे भविष्य
ति दिवाकर॥ तदा त्वमहमश्वामि नाम यथा स्यान्मति र्मम॥ ५१ ॥ कृते त्वंसृत संकल्पमुपवासांश्च चक्रिरे॥ सप्तमे हनि सूर्योसोस्वप्नेव
चनमब्रवीत्॥ ५२॥ किशोर्या विधवायोगो वर्त्तते च कथं भवेत्॥ सा ते पत्नी दास्यामि त्वत्र्यांपन्नाय तेक्षणाम्॥ ५३ ॥ मुकुन्द उवाच
॥ ॥ यदि देव प्रसन्नोसि विश्वं सृजसि त्वं विभो॥ बालवैधव्ययोगं च दग्धं त्वं वक्ष्ये मोहसि॥ ५४ ॥ इति तस्य वचः श्रुत्वा श्रांतना
वहुलाकृता॥ न मन्यते मुकुन्दो सो तथेत्युक्त्वा गतो रविः॥ ५५ ॥ तुलसीव्रतमाहात्म्यात्स्वप्रोक्तं त्वं न कस्यचित्॥ इयं कन्या त्वया देया मु
कुंदाय दयामला॥ ५६॥ तुलस्योद्वाहमाहात्म्याद्विधवात्वं गमिष्यति॥ राज्ञो [illegible]ः किशोर्यास्तु तस्या मे वाप्यजायत॥ ५७ ॥ आ
गता कन्यका काचित्सखीसहस्रसमन्विता॥ भर्तारं वदति स्वप्ने माता किशोरिका॥ तत्रापि तथेत्युक्त्वा प्रदास्ये वलिमुत्तमं॥
एतद्वलेन पश्चात्तु विवाहोस्या भविष्यति॥ ५८ ॥ श्रुत्वा वलिप्रदानं सा स्वप्ने चिंतातुराभवत्॥ कथा दशाक्षरी विद्या के देवि सुस
मर्चनम्॥ नरकद्वारमूलं तु मद्वलात्पशुमारणाम्॥ एवं सा तु समुत्थाय स्वप्ने तु पशुमारणां॥ ५९ ॥ एवं सा तु समुत्थाय प्रायमिति
स

का.म.
४५

सानपश्य त्रिलोकांश्च न मार्गं न सखीगणान्॥ ३८॥ ध्यायंती हृदये विष्णुं तुलसीदेवरूपिणी॥ नांगुष्ठी गुंमनश्चक्रे विलेपीक्ष्यवान्वली॥ नानामेस
क्ष्तास्तेन न लभेवांतरंकश्चित्॥ मालाकारगृहं गत्वा नस्यैडव्यपृयक्कत॥ ३९॥ येन केन प्रकारेण किशोर्याः सह संगमः॥ यथा स्यात्क्रियतां
मद्धे देय मस्माच्च तुर्गणाम्॥ ४०॥ तयाच्च वहु वोपाया हप्तास्तकुह णायच॥ न ददर्श तदोपायं भवदस्या विलेपिनी॥ ४१॥ तद्दृश्य तेम
योपायस्त्वयायस्त्रीत्व मेश्चना॥ मयातदेवकर्त्तव्यं इवाग्रहणास्त्विये॥ ४२॥ विलेपुवाच॥ ॥ नवकन्यात्भूत्वाहं तयामिकुसु
मन्विव॥ अग्रेयज्ञाविभवतुग्रहाणान्दिशां तशाते॥ ४३॥ तयापि च तथेस्युक्के सममंमां निश्चयः कृतः॥ अष्टम्यां सागता तत्र किशो
रीतासुवाचह॥ ४४॥ मालाकृते श्चोनवमी तुलस्याः पाणिपीडनं॥ निष्ठनतनस्त्वया नेयास्कुटाः पुष्पसंभवाः॥ ४५॥ मालि
न्युवाच॥ ॥ मत्कन्या चागता या मान्ना नाकौतुककारिणी॥ यद्यत्प्रोक्तं त्वया वाले सा समानयति त्वरा॥ ४६॥ तयासापि तथे
त्युक्का मालिनी स्वगृहं ययौ॥ कथितः सर्ववृत्तांतो विलेपन्ये ततो भवत्॥ ४७॥ प्राप्रामहेन्द्रपदवीं सेवंगुरवमवापसः॥ मा
लिन्याश्चिताराक्षौसुकुटाविविधास्तदा॥ ४८॥ विष्णुकांच्यां तदा राजा जयसेनो वभूव ह॥ तस्य पुत्रो मुकुंदो भून्नस्तूर्यभक्ति

45
रा.म.
४५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्यमुपस्थितं॥ महाराजकुमारस्य वधूकन्याभविष्यति॥ ७४॥ ततः प्रोवाच मंत्रीन्ये द्वादशं लग्नमुत्तमं॥ रात्रौ तिष्ठति युग्माख्यं रविः षष्ठे
विधुश्च खे॥ ७५॥ भवेमीमे गुरुर्धर्मे पंचमे बुधभार्गवौ॥ शनिस्तृतीये ऽरौ राहुर्विवाहसमयः सतु॥ ७६॥ उभौ संमनसे भारा
वुभावपिधनान्वितौ॥ द्वादशपामायथौसायं राजपुत्र ससैनिकः॥ अब्रवीत्तत्र कनकंनेकी राजपुरोहितः॥ ॥नेक्षुवाच॥
अथो निरोधःक्रियतां किशोर्याश्चनृपाज्ञया॥ ७८॥ भविष्यति महादेवीनोद्दृश्यापुरुषैः क्वचित्॥ इति तद्वचनं श्रुत्वा पुरुषास्तु
नृपकृताः॥ ७९॥ जायारूपो विलेपीत्तु दैवात्तत्रैव संस्थितः॥ ततोऽर्द्धरात्रवेलायां मुकुंदो भवनं ययौ॥ ८०॥ तलस्पर्श्रोस्थिता
बाला किशोरी संस्मरं हरिम॥ ततो घनघटाशब्दस्तुमुलः समपद्यत॥ ८१॥ महान्वायुर्ववौ तत्र प्रशांताः सर्वदीपकाः॥ विद्युत्व
नाश्च कस्मिताअंधीभूतौ खिलो जनः॥ मिथ्यानभास्करं वचो मुकुंदोऽचिंतयद्धृदि॥ अनैप्रनकिंतलोकैर्वैधव्यस्यतु कारणम्॥
८२॥ भीतो मुकुंदो हृदये पात्वा प्रतिभास्करं॥ तस्याः संधीष्टुतंतस्याः करपद्मं विलेपिना॥ ८४॥ तस्याः करस्पर्शसंसर्गोत्स्वर्गा
दुत्रपपातवा॥ नीतस्तेन विलेपीत्तु लन्का लेयमसंदिरं॥ ८५॥ वाद्य आसीत्तकलकलो मुकुंदोपंभस्तास्तिविति॥ क्षणाद्देव ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्यमुपस्थितं ॥ महाराजकुमारस्य वधूकन्या भविष्यति ॥ ७४ ॥ ततः प्रोवाच मंत्रीन्यं द्वादश्यां लग्नमुत्तमं ॥ रात्रौ तिष्ठति कुंभाख्यं रविः षष्ठे
विधुश्च खे ॥ ७५ ॥ भवे भौमे गुरुस्तुर्ये पंचमे बुधभार्गवौ ॥ शनिस्तृतीये ऽरौ राहुर्विवाहसमयः सतु ॥ ७६ ॥ उभौ संमतसेनारा
नुभावपि धनान्वितौ ॥ द्वादश्यामाययौ सायं राजपुत्रः ससैनिकः ॥ अब्रवीत्तत्र कनकंनेकी राजपुरोहितः ॥ ॥ नेत्र उवाच ॥
अपोनिरोधः क्रियतां किशोर्याश्च न पाजया ॥ ७७ ॥ भविष्यति महादेवी नोद्दश्यापुस्तषेः क्वचित् ॥ इति तद्वचनं श्रुत्वा गुप्तपास्तु
निपकृताः ॥ ७९ ॥ जायारूपो विलेपीतु देवात्रैव संस्थितः ॥ ततोऽर्द्धरात्रवेलायां मुकुंदोभ्यंतरे ययौ ॥ ८० ॥ तल्पस्योपरि स्थिता
बाला किशोरी संस्मरं हरिम ॥ ततो घनघटाशब्दस्तुमुलः समपद्यत ॥ ८१ ॥ महावायुर्ववौ तत्र प्रशांताः सर्वदीपकाः ॥ विद्युद्व
नाश्चकमिता अंधीभूतो खिलो जनः ॥ मिथ्यानभास्करवचो मुकुंदोऽचिंतयद्धृदि ॥ अनेन प्रतर्कितं लोकैर्वैधव्यस्य तु कारणम् ॥
८२ ॥ भीतो मुकुंदो हृदये पावद्धा प्रतिभास्करं ॥ तस्यां संधौ धृतं तस्याः करपद्मं विलेपिना ॥ ८४ ॥ तस्याः करस्य संसर्गात्स्वर्गा
द्वज्रपपात वा ॥ नीतस्तेन विलेपीतु तत्कालं यममंदिरं ॥ ८५ ॥ वाद्य आसीत्कलकलो मुकुंदो यं प्रजल्पिति ॥ क्षणाद्देव ततो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिश्चितं ॥ भावयित्वा समाहूय चन्दनावाक्यमब्रवीत् ॥ ६१ ॥ निवेघदृष्टस्वप्नं तु कीदृगस्य फलं वद ॥ ॥ स्वप्नोध्याय ॥ ॥ फलं तु स
म्यकल्याणि त्वानि ष्टं विनश्यति ॥ ६२ ॥ विवाहो भविता शीघ्रं तुलसीब्रतकारणात् ॥ इत्थं स्वप्नफलं श्रुत्वा तावत्कुकुटं शक्तिं
॥ ६३ ॥ श्रुत्वा सा सहसोत्थाय स्नानोद्योगमुरीकरत् ॥ यावदायाति सा स्नानं कृत्वा गेहे कि शोरिका ॥ ६४ ॥ तावद्धितेपी मालिन्याः पु
त्रीभूत्वा समाययौ ॥ कनकेशाश्वगोपुच्छैस्समश्रुचोन्पाटितं बलात् ॥ ६५ ॥ अंतरेसा टकाष्टस्थानिंवृम्यां च कृतौ स्मनो ॥ सर्वालं
कारसंयुक्ता कदाक्षयति वापरान् ॥ ६६ ॥ नज्ञाता सन्तु केनापि पुमान् स्त्री रूपधारकः ॥ ध्यानं कृत्वा नयाहसो प्रसार्यैत्वेयदा
नदा ॥ ६७ ॥ दत्तो विलेपी पुष्पाणि विलोकयति सर्वतः ॥ कथमस्या ममह स्तोभविष्यति विचिंतयन् ॥ ६८ ॥ स्वं दिनत्रयं त
स्यप्रयातं तु मुनीश्वराः ॥ तस्मिंन्नहनि संजातः कनकः शोकपीडितः ॥ ७० ॥ किं कार्यं मयुना स्मामिराजपुत्रो वरिष्यति ॥ ए
वं चिंतयतस्तस्य प्राप्तः कालो वभूव ह ॥ ७१ ॥ राजलोकाः समायाता नष्टहीत्वा वस्त्र वाहनं ॥ अभ्यंतरे समागत्य मंत्री वचनमब्र
वीत् ॥ ७२ ॥ गृहेस्ति नवकन्यैका सकुदार्थं प्रदीपनाम ॥ माविचारो स्तु भवतेन्टपाज्ञा परिपाल्यतां ॥ कनकेन तथेत्युक्तं मम मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्त्तिके ॥८॥ भीष्मस्य पंचकं कृत्वा कार्त्तिकस्य फलं लभेत् ॥ सत्यव्रताय शुचये गांगेयाय महात्मने ॥ ९ ॥ भीष्मायैतद् ददाम्यर्घ्यमाज
न्मब्रह्मचारिणे ॥ सर्वेनानेन मंत्रेण तर्प्पणं सर्व्ववर्णिकं ॥१०॥ अंगतास्वर्गिमायां प्रदेयः पापपूरुषः ॥ आपुत्रेणाक्कर्त्तव्यं स
र्वथा भीष्मपंचकं ॥११॥ यः पुत्रार्थं व्रतं कुर्यात्स स्त्री को भीष्मपंचकं ॥ प्रदत्ता पापपुरुषं वर्षमध्ये सुतं लभेत् ॥१२॥ अवश्यमेव क
र्त्तव्यं तस्माद्भीष्मस्य पंचकं ॥ अत्रैव हि प्रकर्त्तव्यः प्रबोधस्तु हरेः खग ॥१३॥ हतः शंखासुरो दैत्यो नभसः शुक्लपक्षके ॥ एकादश्यां त
तो विष्णुश्चातुर्मास्योत्रसुप्तवान् ॥१४॥ क्षीराब्धौ जागृतोसौ एकादश्यां तु कार्त्तिके ॥ अतः प्रबोधनं कार्य्यमेकादश्यां तु वैष्णवैः ॥
१५ ॥ उत्तिष्ठोत्तिष्ठ शंखचक्रउत्तिष्ठांभोधिचारक ॥ उत्तिष्ठ मुनिनौधारत्रैलोक्ये मंगलं कुरु ॥१६॥ उत्तिष्ठ धरणीधार वराहादिकधार
क ॥ कूर्मरूपधरोत्तिष्ठ त्रैलोक्ये मंगलं कुरु ॥ उत्तिष्ठोत्तिष्ठ वाराह दंष्ट्रोद्धृतवसुंधर ॥१७॥ हिरण्याक्षप्राणघातिन् त्रैलोक्ये मंगलं
कुरु ॥ हिरण्यकशिपुघ्नस्त्वं प्रह्लादानन्ददायक ॥१८॥ लक्ष्मीपते समुत्तिष्ठ त्रैलोक्ये मंगलं कुरु ॥ उत्तिष्ठ बलिदर्पघ्न देवेन्द्रपददा
यक ॥ उत्तिष्ठादितिपुत्र त्वं त्रैलोक्ये मंगलं कुरु ॥१९॥ उत्तिष्ठ हैहयाधीश समस्तकुलनाशन ॥ रेणुकागर्भसमुत्तिष्ठ त्रैलोक्ये मंगलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञानं मालाकारसुतामता॥ ८६॥ततस्तयोर्विवाहोभूद्राज्यं प्राप किशोरिका। किशोर्यां स्तु समुत्पन्नश्चाभ्यां नरस्तुलसीव्रतात्॥ ८७॥आदौ
शास्त्रं सत्यमासीत्ततो देवो दिवाकरः॥ तुलसीव्रतमाहात्म्यात्कथं नस्युर्मनोरथाः॥ ८८॥सौभाग्यार्थं धनार्थं विद्यार्थं मुक्तिहेतवे॥ सं
तत्यर्थं प्रकर्त्तव्यं तुलस्याः पाणिपीडनं॥ ८९॥इति श्रीसनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये तुलसीविवाहोत्सवरूकोनविंशो
ध्यायः॥ ॥वालखिल्याऊचुः॥ ॥कार्तिकस्यामले पक्षे स्नात्वा सम्यग्यतव्रतः॥ एकादश्यां तु गृह्णीयात् व्रतं पंचदिनात्मकं॥
१॥शरपंजरसुप्तेन भीष्मेणैव महात्मना॥ राजधर्मा दानधर्मा मोक्षधर्मास्ततः परं॥ २॥ कथिताः पांडुदायादैः कृष्णेनापि श्रुता
स्तदा॥ ततः प्रीतेन मनसा वासुदेवेन भाषितं॥ ३॥धन्यधन्योसि भीष्म त्वं धर्मः संश्राविता स्त्वया॥ एकादश्यां कार्त्तिकस्य याचि
तं वजलं त्वया॥ ४॥अर्जुनेन समानीतं गांगं वाणस्य वेगतः॥ तुष्टानि तव गात्राणि तस्माद्दद्य दिनावधि॥ ५॥पूर्णां तं सर्वे
लोकास्त्वां तर्पयेत्वर्घ्यदानतः॥ तस्मात्सर्वप्रयत्नेन मम संतुष्टकारकं॥ ६॥एतद्व्रतं प्रकुर्वन्तु भीष्मपंचकसंज्ञितम्॥ का
र्त्तिकस्य व्रतं लत्वा नकुर्याद्भीष्मपंचकं॥ ७॥समग्रं कार्त्तिकव्रतं मिथ्या तस्य भविष्यति॥ असक्तश्चेन्नरो भूयाद समर्थश्च

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुण्याहं वाचयित्वाथ नान्दीश्राद्धं समाचरेत्॥ वेदवाद्यादिनिर्घोषैर्विष्णुमूर्त्तिं समानयेत्॥ ३४॥ तुलस्या निकटे सा तु स्थाप्या पात्वां नरिता:
पटै:॥ आगच्छ भगवन्देव अर्चयिष्यामि केशव॥ ३५॥ तुभ्यं दास्यामि तुलसीं सर्वकामप्रदो भव॥ दद्यात्रिवारमर्घ्यं च पाद्यं विष्टरमे
व च॥ ३६॥ ततश्चाचमनीयं च त्रिसूत्रं च प्रदापयेत्॥ ततो दधि घृतं क्षौद्रं कांस्यपात्रपुटीकृतं॥ ३७॥ मधुपर्कं गृहाण त्वं
वासुदेव नमोऽस्तु ते॥ ततो ये स्वकुलाचाराः कर्त्तव्या विष्णुतुष्टये॥ ३८॥ हरिद्रालापनाभ्यंगं कार्यं सर्वं विधाय च॥ गोधूलीसमये
प्राप्ते तुलसीकेशवौ पुनः॥ पृथक्पृथक्कृतं ततः कार्यौ संमुखौ मंगलं पठेत्॥ ईषद्दृष्टे भास्करे तु संकल्पं तु समापयेत्॥ ४०॥
स्वगोत्रप्रवरानुक्त्वा तत्र त्रिप्रतुषादिकं॥ अनादिमध्यनिधन त्रैलोक्यप्रतिपालक॥ ४१॥ इमां गृहाण तुलसीं विवाहविधि
नेश्वर॥ पार्वतीबीजसंभूतां वृन्दाभस्मनि संस्थितां॥ ४२॥ अनादिमध्यनिधन वल्लभां ते ददाम्यहम्॥ पयोघटैश्च सेवाभि:
कन्यावद्वर्द्धिता मया॥ ४३॥ त्वत्प्रियां तुलसीं तुभ्यं दास्यामि त्वं गृहाण भो॥ एवं दत्वा तु तुलसीं पश्चात्तौ भोजयेत्ततः॥ ४४॥ रात्रौ
जागरतां कुर्याद्विवाहोत्सवपूर्वकं॥ प्रतिवर्षमिदं कुर्यात्कार्त्तिकव्रतसिद्धये॥ ४५॥ इति श्रीसनत्कुमारसंहितायां कार्त्तिकमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१ उत्तिष्ठ रक्षोदलन अयोध्या स्वर्गदायक । समुद्रसेतुकर्त्ता त्वं त्रैलोक्ये मंगलं कुरु ॥ २१

का.म्प. कुरु ॥ २१ ॥ उत्तिष्ठ कंसहर राम दग्धूर्णितलोचन ॥ उत्तिष्ठ हलपाणे त्वं त्रैलोक्ये मंगलं कुरु ॥ २२ ॥ उत्तिष्ठ त्वं गयावासिन् यक्तलोकिक

४८ हन्तक ॥ उत्तिष्ठ पद्मासन गत्रैलोक्ये मंगलं कुरु ॥ २३ ॥ उत्तिष्ठ म्लेच्छनिवह खलसंहारकारक ॥ अश्ववाह युगान्ते च त्रैलोक्ये मंगलं

कुरु ॥ २४ ॥ उत्तिष्ठोत्तिष्ठ गोविंद उत्तिष्ठ गरुडध्वज ॥ उत्तिष्ठ कमलाकान्त त्रैलोक्ये मंगलं कुरु ॥ मंत्रैरानेन गोविंदमर्चित्वोत्थाप

येद्द्विजाः ॥ इदं किस्तु रयं मन्त्रो वैदिको थ पुराणजः ॥ २५ ॥ ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्य्यसोमादिभिर्वंदितपादपद्म ॥ बुध्यस्व देवेश

जगन्निवास मंत्रप्रभावेन सुखेन देव ॥ २७ ॥ इत्युक्त्वा शंखभेर्यादि प्रातःकाले तु वादयेत् ॥ वीणावेणुमृदंगादि गीतनृत्यादि वा

दयेत् ॥ २८ ॥ उत्थापयित्वा देवेशं पूजां तस्य विधाय च ॥ सायंकाले प्रकर्त्तव्यः तुलस्या हृजो विधिः ॥ २९ ॥ अवश्यमेव कर्त्तव्यः 48

तुलस्याहृजो विधिः ॥ २९ प्रतिवर्षं तु वैष्णवैः ॥ विधिं तस्य प्रवक्ष्यामि यथा सांगा क्रिया भवेत् ॥ ३० ॥ विष्णोस्तु प्रतिमां कुर्यात् तुलस्य रम.

स्वर्णजां शुभां ॥ न दर्शार्धेन दर्शार्धं यथाशक्त्या प्रकल्पयेत् ॥ ३१ ॥ प्राणप्रतिष्ठां कृत्वा च तुलसीविष्णुरूपयोः ॥ तत उत्थापयेद्दे ४८

वं पूर्वोक्तैश्च स्तवादिभिः ॥ ३२ ॥ उपचारैः षोडशभिः पूजयेत्तु तपोक्तितः ॥ देशकालौ ततः स्मृत्वा गणेशं तत्र पूजयेत् ॥ ३३ ॥

तप्रभो ॥ मत्कृतं पूजनं गृह्य सुतुष्टो भव सर्वदा ॥ १३ ॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ जनार्दन ॥
१४ ॥ एवं विसर्ज्य देवेशमाचार्यं प्रदापयेत् ॥ मूर्त्यादिकं सर्वमेव कृतकृत्यो भवेन्नरः ॥ १५ ॥ प्रतिवर्षं करोत्येवं तुलस्युद्वहनं शुभ
म् ॥ इहलोके परत्रापि विपुलं स यशो लभेत् ॥ १६ ॥ प्रतिवर्षं सः कुर्यात्तुलसीकरपीडनम् ॥ भक्तिमान्धनधान्यैः सपुत्रो भव
तिनिश्चितं ॥ १७ ॥ इति श्रीसनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये द्वादशीकृत्यमेकविंशोध्यायः ॥ ॥ वालखिल्या ऊचुः ॥ ॥
कार्त्तिकस्यासिते पक्षे चतुर्दश्यां समागमत् ॥ वैकुंठेशस्तु वैकुंठाद्वाराणस्यां कृते युगे ॥ १ ॥ रात्र्यां तुर्यं शशेषायां स्नात्वा सोमणि
कर्णिके ॥ गृहीत्वा हेमपद्मानि सहस्रैकं ततो व्रजत् ॥ २ ॥ अतिभक्त्या पूजयितुं शिवया सहितं शिवम् ॥ विधाय पूजां वैश्वेश्वीं ततः
पद्मैरपूजयत् ॥ ३ ॥ सहस्रसंख्यां कृत्वा दादैकनाम्ना ततः परं ॥ आरब्धं पूजनं तेन शिवसद्भक्तिमेयता ॥ ४ ॥ एकपद्मं पद्ममध्ये नि
लीयान्तर्हरो गतः ॥ ततः पूजितवान्विष्णुरेकोनकमलं त्वभूत् ॥ ५ ॥ इतस्ततस्तेन दृष्टं पद्मं तिष्ठति न क्वचित् ॥ कमले शुभ्र मो जा
तो थवानामस्तु मे भ्रमः ॥ ६ ॥ क्षणं विचार्य सहरिर्नेमेनामन्त्रमो भवत् ॥ पद्मे षेव भ्रमो जातो विचार्यैवं पुनः पुनः ॥ ७ ॥ सहस्र

का.म्य.
४९

हात्म्ये एकादशीकृत्य तुलसीविवाहविधिर्विंशोऽध्यायः॥ ॥वालखिल्या ऊचुः॥ ॥ततः प्रभातसमये तुलसीं विष्णुमर्चयेत्॥ वह्निसंस्थाः
पनं कृत्वा द्वादशाक्षरविद्यया॥१॥ पायसाज्यक्षौद्रतिलैर्हुनेदष्टोत्तरं शतं. ततः स्विष्टकृतं कृत्वा दद्यात्पूर्णाहुतिं ततः॥२॥ आचार्यं वस्
मभ्यर्च्य हेम शेषं समापयेत्॥ चतुरो वार्षिकान्मासान् नियमं यस्य यत्कृतं॥ कथयित्वा द्विजेभ्यस्तु तथा मान्य परिपूजयेत्॥ इदं व्रतं मया दे
व कृतं प्रीत्यै तव प्रभो॥४॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन॥ रेवतीतुर्यचरणं द्वादशीसंयुतो नरः॥५॥ न कुर्यात्पारणां कुर्व
न्नैतिः फलतां व्रजेत्॥ ततो येषां पदार्थानां वर्जनं च कृतं भवेत्॥ चातुर्मास्येऽथवा चोर्जे ब्राह्मणेभ्यः समर्पयेत्॥ ततः सर्वं समस्तीया
यद्यन्यत्क्रतेस्थितं॥७॥ दंपतीभ्यां सह वा त्र भोक्तव्यं वा द्विजैः सह॥ ततो भुक्तोत्तरं यानि गलितानि दलानि च॥८॥ स्वयं तुलस्या
स्तु भुक्त्वा सर्वपापैः प्रमुच्यते॥ इक्षुखंडं तथा धात्रीफलं कोलफलं तथा॥९॥ भुक्त्वान्नभोजनस्यांते नस्योच्छिष्टं विनश्यति॥ एषु
त्रितयभक्षं वेदैकैकमपि येन तु॥१०॥ ज्ञेय उच्छिष्ट आवर्पनरो सो नात्र संशयः॥ ततः सायं पुनः पूज्यो इक्षुदंडैश्च मंडितो॥११॥
तुलसीवासुदेवौ च कृतकृत्यो भवेन्नरः॥ ततो विसर्जनं कुर्यात् दत्वा दायादिकं हरेः॥१२॥ वैकुंठं गच्छ भगवन् तुलस्या सहि

राम
४९

महादेवनिथौग्रामेषुहृत्तमैंमणिकर्णिके॥स्नात्वावैश्वेश्वरंलिंगंवैकुंठदैर्च्यपूजितं॥२०॥सहस्रकमलैस्सम्याङ्गविष्णोर्ममप्रिया॥
विख्यातात्रिषुलोकेषुवैकुंठाख्याचतुर्दशी॥२१॥अन्यदप्युदास्यामिशृणुविप्रोवचोमम॥पूर्वरात्रौतुतत्पूजाकर्त्तव्यासर्वजाति
भिः॥२२॥उपवासदिनेकुर्यात्सायंकालेनवार्चनं॥पश्चात्समार्चनंकार्य्यमन्यथानिःफलंभवेत्॥२३॥याह्यात्तुहरिपूजायां
रात्रिव्याप्याचतुर्दशी॥अरुणोदयवेलायांशिवपूजांसमाचरेत्॥२४॥सहस्रकमलैर्विष्णुरादौयैःपूजितोनरैः॥पश्चादी
शःपूजितस्तेनजीवन्मुक्तःसएवहि॥२५॥सायंस्नात्वापंचनदेबिंदुमाधवमर्चयेत्॥सहस्रनामभिर्विष्णोःकमलैःसुमनो
हरैः॥२६॥मणिकर्णिंगतःप्रातःस्नात्वाविश्वेशमर्चयेत्॥सहस्रनामभिःपुष्पैर्जीवन्मुक्तःसएवहि॥२७॥स्नात्वायोवि
मुक्ताख्यांचानंतसेनसर्वसेत्॥रुद्रकोट्यांततःस्नात्वाप्रणवेशंसमर्चयेत्॥२८॥पृथिव्यांचऋतौयेयेधर्मप्रोक्तामनीषिभि
ः॥सर्वेषांफलमाप्नोतिनात्रकार्याविचारणा॥२९॥आदौस्नात्वावह्नितीर्थेयज्ञेन्नारायणंततः॥रेमौदकेततःस्नात्वाकेदा
रेशंसमर्चयेत्॥३०॥इहैवार्थवनंनाथोमंवेन्नास्त्यत्रसंशयः॥स्थलपद्मैस्तत्रपूजाकर्त्तव्याजलजक्षपात्॥३१॥अ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.म्मा. ५० पद्मसंकल्पः पूजार्थं तु कृतो मया॥ अर्घ्यैः कथं महादेव सको नकमलैर्मया॥ ८॥ पद्मं नेत्रं गमिष्यामि भंगस्यादासनस्य तु॥ अतः परं
किंविधेयं चित्तो द्विग्नो हरिस्तदा॥ ९॥ एकः प्रकार उत्पन्नो हृदये स्य मुनीश्वराः॥ पुंडरीकाक्ष इत्येवं मां वदंति मुनीश्वराः॥ १०॥
नेत्रं मे पद्मसदृशं पद्मार्थे त्वर्पयाम्यहम्॥ इति निश्चित्य मनसि दत्वा तर्जनिकां सतु॥ ११॥ नेत्रमध्ये तदुत्पाद्य महादेव मु
पूजितः॥ ततो महेश्वरस्तुष्टो वाक्यमेतदुवाच ह॥ १२॥ महादेव उवाच॥ ॥ त्वत्समो नास्ति मद्भक्तस्त्रैलोक्ये सचराचरे॥ राज्यं द
त्तं त्रिलोक्यास्ते भव त्वं लोकपालकः॥ १३॥ अन्यं वरय मद्द्वेवरं यन्मनसेप्सितं॥ अवश्यमेव दास्यामि नात्र कार्या विचारणा
॥ १४॥ मद्भक्तिं तु समालंब्य ये द्विषंति जनार्दनं॥ ते महद्ध्यानतां विस्मो व्रजेयुर्नरकं ध्रुवं॥ १५॥ विष्णुरुवाच॥ ॥ त्रैलोक्यरक्षाक 50
रणं ममादिष्टं त्वया शिव॥ दुर्मदाश्च महासत्वा दैत्या मार्याः कथं मया॥ १६॥ शिव उवाच॥ ॥ एतत्सुदर्शनं चक्रं सर्वदैत्यनिकं राम
तनं॥ गृहाण भगवन्विष्णो मया तुभ्यं निवेदितम्॥ १७॥ अनेन सर्वदैत्यानां भगवन्कदनं कुरु॥ एवं चक्रं हरेस्तस्य दत्वा व ५०
चनमब्रवीत्॥ १८॥ शिव उवाच॥ ॥ वर्षे हैमलंवाख्ये मासे श्रीमति कार्तिके॥ शुक्लपक्षे चतुर्दश्यां मत्तोऽभ्युदयं प्रति॥ १९॥
बै

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोवरम्॥ गतेषु शैलदेवेषु राजानो धैर्यविक्रमाः॥ ८४॥ पापिष्ठाश्च दुराचारा नानानीतिपरिपीडिताः॥ कलेरष्टनवर्षाणि भविष्यति य
दा खग॥ ८५॥ श्रौतस्मार्गस्य लोपस्तु भविष्यति न संशयः॥ तदा कोला भविष्यंति घपानपरायणाः॥ ८६॥ स्वल्पायुषः स्वल्प
भाग्या नानारोगैश्च पीडिताः॥ द्विजास्तु दक्षिणोदेशे वेदज्ञाः संभवंति च॥ ८७॥ आनीय ताम्वा ककुत्रान्धर्मं संस्थापयिष्यति
॥ ॥इति श्रीसनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये वैकुंठचतुर्दश्युपाख्यानं नाम द्वाविंशोध्यायः॥ ॥वालखिल्या ऊ
चुः॥ ॥कार्त्तिक्यां पूर्णिमायां तु कुर्यात्त्रिपुरमुत्सवं॥ दीपो देयोऽवश्यमेव सायंकाले शिवालये॥ १॥ त्रिपुरो नाम दैत्येन्द्र
प्रयागे तप आस्थितः॥ लक्षवर्षाणि तप्तस्तु त्रैलोक्ये सचराचरम्॥ २॥ तत्तपस्तेजसा दग्धुमारब्धं भुवनत्रयं॥ नाना दे
वांगना देवैः प्रेषितास्तं विमोहितुं॥ ३॥ न तासां वशगः सोभूद्धर्षितो वा पिधर्षितः॥ न क्रोधलोभमोहानां वशो दैत्यश्च जा
यते॥ ४॥ वरं दातुं ययौ ब्रह्मा नारदादिभिरन्वितः॥ ॥ब्रह्मोवाच॥ ॥वरं वरय भद्रं ते संतुष्टोहं पितामहः॥ ५॥ त
पसा तु फलेसिद्धे कः क्लेशं कुरुते जनः॥ ॥त्रिपुर उवाच॥ ॥अमरं कुरु मां ब्रह्मन्करोमि ह्यन्यथा तपः॥ ६॥ दातुं श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.म्ब. दौस्नात्वा स्वयंभुव्यां वेणीमाधवमर्चयेत्॥ जान्हव्यां ततः स्नात्वा संगमेशं प्रपूजयेत्॥ ३२॥ रक्तपद्मैः श्वेतपद्मैर्हरिं मद्दुं क्रमेणतु॥
५१ सर्वास्त्रियस्तस्य वश्याः सर्वे विस्मयोदिते॥ ३३॥ मोक्षार्थ काशिकामध्ये विंदुमाधवविश्वपौ॥ न लभेत्पूजयित्वा किं मोक्षवा
तारकं विना॥ ३४॥ विना यो हरिपूजां तु कुर्यात्तस्य चार्चनं॥ वृथा तस्य भवेत्पूजा सत्यमेतद्वचो मम॥ ३५॥ एवं तस्मै वरं दत्वा तथां
तर्धानं ययौ शिवः॥ तस्मात्सर्वप्रयत्नेन पूज्यौ हरिहरावुभौ॥ ३६॥ प्राप्ते कलियुगे घोरे शौचाचारविवर्जिते॥ तत्वसंख्ये वर्ष
शते गते देवो महेश्वरः॥ ३७॥ वाराणसीस्थलिंगानि पाताले संनयिष्यति॥ ततो द्विगुणवर्षैस्तु गंगा वाराणसी तथा॥ ३८॥ 51
भविष्यति अदृश्या सा सत्यं तु मुनीश्वराः॥ अत्र हीनायदा काशी भविष्यति तदा मुने॥ ३९॥ नाशस्तु लिंगचिन्हानि प्रभा राम:
:सकला जनाः॥ चतुर्दशाब्दं दुर्भिक्षं महामारीसमुद्भवः॥ ४०॥ गोवधश्चापि सर्वत्र मृत्तिकाभस्मसन्निभाः॥ गंगोत्तर्यां तु धा ५१
राया पतेद्भागीरथाश्रमे॥ ४१॥ हरिद्वाराच्च वायव्ये तस्यालोपो भविष्यति॥ भागीरथ्यां गतायां तु मर्कतं तु सन्निभाः॥ ४२॥ भ
विष्यति जले कीटस्तोयं नीली नभे तथा॥ चतुर्वर्षसहस्रैस्तु शैलस्थाः सर्वदेवताः॥ ४३॥ सत्वं तस्का गमिष्यंति मानसं चस

नयातां चक्रतुर्देवा द्वारि तिष्ठति वारिता ॥ १९ ॥ कदाचित्तस्य गेहे तु नारदः समुपाययौ ॥ तेनापि पूजितो भक्त्या पप्रच्छास्य पराक्रम
म् ॥ २० ॥ नारद उवाच ॥ ॥ ईदृशो जयघोषस्तु केनापि न कृतो भुवि ॥ अस्मिन्देशे तु दैत्येन्द्र किमिदानीं निगद्यतां ॥ २१ ॥ यो यत्र च गतो
दैत्यो जानन्नत्र प्रभुः स हि ॥ तव नाम न गृह्णाति वक्ति च स्वं पराक्रमं ॥ २२ ॥ इति श्रुत्वा मुनिलेन सघस्व विदायितः ॥ क्रोधश्चार
स्य महाञ्जातः किं कर्तव्यं मयाधुना ॥ २३ ॥ विश्वकर्मा ततो मा कृत्य वाक्यमेतदुवाच ह ॥ शीघ्रं कुरु त्रिधा त्वं नो विश्वकर्मन्सुरत्रयम्
॥ २४ ॥ विमानं तु त्वं यत्रेच्छा मत्र तत्र गमिष्यति ॥ इति तस्य वचः श्रुत्वा तत्तथापि च तथाकरोत् ॥ २५ ॥ रूपं चैवं समास्थाय त्रि
पुरेषु समाश्रितः ॥ नारदस्य तु वाक्येन दैत्या वन्दीकृता सदा ॥ २६ ॥ पुरे गौ केन पाताले भ्रमते त्रिपुरासुरः ॥ स्वर्गं चापि पुरे
केन धरणीमटते पुरा ॥ २७ ॥ कांश्चित्संताडयत्येवं संस्मारयति कानपि ॥ ददाति केषां स्वामित्वं स्वेच्छाचारी महाबलः ॥ २८ ॥
तेनेत्थं पंच लक्षाणि सर्वलोकाक्रमाद्धुना ॥ तदा देवाः समायम्य नारदो वाक्यमब्रवीत् ॥ २९ ॥ नारद उवाच ॥ ॥ पराक्र
माल्लुब्धिकाद्देवेन्द्रकगतासुधीः ॥ विचारयन्तु भो देवा वधाय त्रिपुरस्य च ॥ ३० ॥ इत्थं मुनिवचः श्रुत्वा सलज्जोभूद्दधो
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰ख॰ ५२

कोसि चेद्दुहिता नाथ गच्छ सत्वरं॥ ॥ब्रह्मोवाच॥ ॥मयापि चालं मर्त्ये वं मि तरेषां तत्का कथा॥ ७ ॥अवश्यं देहिनां मृत्युः सम्भाव्यं याचयस्व
मे॥ ॥त्रिपुर उवाच॥ ॥न मे मृत्युर्देवताभ्यो मनुष्येभ्यो निशाचरात्॥ ८ ॥न स्त्रीभ्यो न च रोगेभ्यो देहे नं वरमुत्तमं॥ब्रह्मणापि तथे
त्युक्तो स स्वलोकं जगाम सः॥ ९ ॥एवं लब्धवरो हांता नानादैत्याः समाययुः॥तान्दैत्यांश्चागतान्दृष्ट्वा वाणापयत दानवान्॥ १० ॥अस्म
द्विरोधिनो देवाधन्ना वा सर्वे स्ववने॥ तेषां निरन्नानि देवतानां समीपतः॥ ११ ॥गृहीत्वा तानि सर्वाणि शीघ्रं वेन्त्यापायतं मम॥इत्या
ज्ञानस्य शिरो हत्वा ते दैत्य दानवाः॥ १२ ॥देवा नागाश्च यक्षाश्च हृत्वा स्याग्रे निवेदिताः॥प्रणम्य सर्वे ते देवा त्रिपुरं च विजिज्ञपुः॥ १३॥
गृह्यतां दैत्यराजेन्द्र यदस्माकं भविष्यति॥ वयं हत्वा गते सेवां जीविष्यामो यथा तथा॥ १४ ॥इति श्रुत्वा वचस्तेषां मधिकार
च्युताः कृताः॥ तेषां स्त्रियः समानीता देववेश्याः सहस्रशः॥ १५ ॥एकं भास्करमुत्सृज्य सर्वदेवान दानवा॥ चक्रुर्यथोक्तं दैत्यस्य
दारस्थाः सर्वस्ववहि॥ १६ ॥सूर्यस्यापि कदेपुत्रं मद्द्वारे स्थीयतां सदा॥ तेनापि च तपेत्युक्तो न द्वारे संस्थितः क्षणम्॥ १७ ॥दद
हं भुवनं सर्वं स्वकरैः क्षणमात्रतः॥ आदिष्टश्च ततस्तेन स्वेच्छया गम्यतामिति॥ १८ ॥ततो गते सो भगवान्भुवनानि विभावयत्॥

राम॰ ५२

52

मारयिष्यति॥ ४२॥ ब्रह्मोवाच॥ ॥एतादृशः कदृष्टोसौ सत्यं वालीकमेवच॥ इतिब्रह्मवचः श्रुत्वाप्रोवाच जगदीश्वरः॥ ४२॥ विष्णुरु
वाच॥ ॥अहोत्रैलोक्यकर्त्तासौ महादेवो वृषध्वजः॥ ब्रह्मन्कथं विस्मृतोसौ सनः कार्यं करिष्यति॥ ४४॥ इत्युक्त्वा सर्वरूपैस्ते
शंकरं सरणं ययुः॥ देवदेव महादेव रक्षास्मान्दुष्टदैत्यतः॥ ४५॥ त्वामेव शरणं प्राप्ता स्त्रिपुरेणाप्रपीडिताः॥ ॥शिवउवाच
॥ ॥ब्रह्मंस्त्वया वरो दत्त उन्मत्तो सौ भवत्तदा॥ ४६॥ प्रहृष्टोसि वरं कस्मात्पुनर्मोरयसे कुतः॥ मम किं नाशितं तेन कस्माद्वध्यो
महासुरः॥ ४७॥ इति तस्य वचः श्रुत्वा हताशास्ति सुरास्तदा॥ तान्विषमान्सुरान्दृष्ट्वा विष्णुर्वचनमब्रवीत्॥ ४८॥ विष्णुरुवाच॥
त्वया प्रतिज्ञा लोकानां पालनाय सदाशिव॥ हतानस्त्वां समायाता शरणं सर्वदेवताः॥ ४९॥ मया नानाविधं दुःखं ह्रियते न तु
सदाशिव॥ एतद्दुःखं मया शक्यमपनेतुं यतो न हि॥ ५०॥ अतस्त्वां याचयाम्यद्य देवान्बन्धैर्विमोचय॥ ॥शिवउवाच॥ ॥
तव वाक्यं करिष्यामि सामर्थ्यं नास्ति मे हरे॥ ५१॥ ममापराधरहितं न हनिष्यामि दानवम्॥ विष्णुरुवाच॥ ॥सामर्थ्यं हं
करिष्यामि सत्यमार्थं सदाशिव॥ ५२॥ करिष्यति कथं दैत्यः शंभोरन्यायमेव सः॥ इति विष्णुवचः श्रुत्वा हाकल्पमितिचा

का॰ख॰
५२

सुरवः॥पुनस्तंनारदप्राहब्रह्मात्मांशरणांबुजा॥ ३१॥ततउत्थायदेवेन्द्रोगृह्णोदेवगणैःसह॥नारदेनसमायुक्तःसत्यलोकंजगामस
॥३२॥तत्रापश्यत्सधातारमुवाचकमलांवचः॥ ॥इन्द्रउवाच॥ ॥धातरस्माद्गतिर्नास्तिहननीमास्त्वयावयं॥३३॥नासायसंस्थि
ताःप्राणास्त्रिपुरस्यतुतेजसा॥इतीन्द्रस्यवचःश्रुत्वाब्रह्मासेन्द्रोसुनैश्वरैः॥३४॥युक्तोवैकुंठमगमद्यत्रास्तेमधुसूदनः॥तत्रगत्वा
महाविष्णुंप्रणिपत्यास्थितासुराः॥ ३५॥अनुगृहीतास्त्कृपालत्तंब्रह्मावाक्यमब्रवीत्॥ ॥ब्रह्मोवाच॥ ॥भगवन्देवदेवेशदे
वापत्तिविनाकेशो॥त्रिपुरासुरनिर्दग्धान्किंदेवांस्त्वमुपेक्षसे॥३६॥विष्णुरुवाच॥ ॥त्वयैवनाशितंब्रह्मन्दत्त्वानानाविधावरा
ः॥देवादिभ्यःकथंतस्यमृत्युःसंभाव्यतेऽधुना॥३७॥नमासतविचारोमेतस्यमृत्युसुरेश्वर॥अस्तिकश्चिद्यदौपायस्तदेवक
रवाण्यहं॥३८॥इतिश्रुत्वावचोविष्णोःसर्वेदुःखाकुंठिताः॥यदानोचुर्वचःकिंचिन्नारदोवाक्यमब्रवीत्॥३९ नारदउवाच॥
कुर्वंतुखेदंमादेवाउपायःकथ्यतेमया॥एकोहरःसृष्टिमध्येनदेवानचमानुषः॥४०॥नराक्षसोनैवदैत्योनभूतोनपि
शाचकः॥नासौपुमान्नचस्त्रीसनजडोनचपंडितः॥४१॥नास्यतातोनवामातानभ्रातानभगिनीनवा॥तथैवनस्यसंतानंसत्यं

राम॰
५२
53

कैलासे ठगतश्चाहं दैत्येन्द्रस्मांगते वै भवं॥ महेश्वरस्य किं वाच्यं तस्यांशोपि न त्वयि॥ ६५॥ इति तद्वचनं श्रुत्वा नारदस्तु विदायितं
॥ गृहीत्वा देवसंघान्स कैलासं त्रिपुरो ययौ॥ ६६॥ तत्र देवैर्महद्युद्धं जातं तत्र दिनत्रयम्॥ पश्चाद्धरेण निहतस्त्रिपुरश्चैक
बाणतः॥ ६७॥ कार्त्तिक्यां पौर्णिमायां तु सर्वे देवाः प्रतुष्टुवुः॥ तस्मिन्दिने सर्वदेवैर्दीपो दत्तो हराय च॥ ६८॥ सर्वथैव प्रदेयोस्यां
दीपस्तु हरतुष्टये॥ विंशतिः सप्तशतकं सहितानादीपवर्णय॥ ६९॥ दद्दीपं पौर्णमास्यां सर्वपापैः प्रमुच्यते॥ ६९॥ पौर्णमा
४५ स्यां तु संध्यायां कर्त्तव्यस्त्रिपुरोत्सवः॥ ७०॥ दृष्ट्वा दीने नमंत्रेण प्रदीपाश्च सुरालये॥ कीटाः पतंगा मशकाश्च वृक्षा जलेस्थ
ले ये विचरन्ति जीवाः॥ दृष्ट्वा प्रदीपं न च जन्मभागिनो भवन्ति नित्यं श्वपचा हि विप्राः॥ ७१॥ कार्त्तिक्यां तु वृषोत्सर्गं कृत्वा नक्तं
समाचरेत्॥ शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतम्॥ कार्त्तिक्यां पौर्णिमायां त्रिपुरस्य महोत्सवः॥ ७२॥ इति श्रीसनत्कु
मारसंहितायां कार्त्तिकमाहात्म्ये त्रिपुरोत्सवो नाम त्रयोविंशोध्यायः॥ ॥ वालखिल्य उवाच॥ ॥ अथोर्जव्रतिनः सम्यगुद्या
पनमिहोच्यते॥ उद्यापने कृते सांगं व्रतं भवति श्चितम्॥ १॥ ऊर्जे शुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥ तुलस्यास्तु परिष्ठान
नि

का.न्य ब्रुवन्॥ ५३॥ अत्रागतानामस्माकं भ्रातृया त्रिपुरासुरः॥ न विलंबो मनो कार्यः किमिदानीं विधीयतां॥ ५४॥ सुरान् म्लानमुखान् दृष्ट्वा
५८ नारदो वाक्यमब्रवीत्॥ ॥नारद उवाच॥ ॥सामग्री क्रियतां शीघ्रमायाति त्रिपुरान्तकः॥ ५५॥ विसृज्य पलायितुं ज्ञात्वा कलहं सोऽभि
लोकयन्॥ ॥शिव उवाच॥ ॥मया न नाशितं तस्य यादृश्यास्य तिनस्थले॥ ५६॥ योद्धुं न दास्यमेव मया मार्यः स दुर्मदः॥ इति
तद्वचः श्रुत्वा समास्वस्तास्तु देवताः॥ ५७॥ सामग्रीं विदधुरकोप्युद्धार्थे सत्तु धूर्जटेः॥ वाणस्त्वयं बभूवास्य वह्निः शल्यं बभू
श्रू५ वह॥ ५८॥ वायुस्तुपुंखतां प्रापुन्मेनाकं च धनुर्दधुः॥ स्यंदनं धरणीजाता वेदाजाता हयोत्तमाः॥ ५९॥ विधाता सारथिर्जातः पता
का च दिवाकरः॥ आतपत्रं च चन्द्रोभूत् गोग्राह्याः पदातयः॥ ६०॥ ततो वेगात्समुत्पत्य नारदस्त्रिपुरं ययौ॥ दृष्ट्वा नारदमा(रा
यान्तं सत्कारैरर्चयत्तं॥ ६१॥ त्रिपुर उवाच॥ ॥सुनेपुनतो पश्यस्वान्यजेयानि सुरासुरैः॥ त्रैलोक्यवाहनाजानंतं रूपातोव म
शोभनम्॥ ६२॥ इति तस्य वचः श्रुत्वा ललाटं कुट्टयन्मुनिः॥ तूष्णीमासीद्दृश्लिष्टे न देवलोकात्सुरोऽब्रवीत्॥ ६३॥ त्रिपुर उवाच॥ ॥ ५८
किमर्थमीदृशी चेष्टा मुने यो घक्तानया॥ मज्ञाग्य समभाग पश्ये दलिक क्षिन्निगद्यताम्॥ ६४॥ ॥नारद उवाच॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारगः॥ स्नानि कार्त्तिके मासि नरः कृयो व्रतानि च॥ ५५॥ इह लोके शरीरी सन्क्लेशयित्वा फलं लभेत्॥ न कार्त्तिकसमो मासो विष्णुसंतु
ष्टिकारकः॥ ५६॥ स्वल्पक्लेशैर्विष्णुलोकप्राप्तिहेतुस्त्वापरो भवेत्॥ ॥सनत्कुमार उवाच॥ ॥इत्युक्ते नैमिषारण्ये वालखिल्यैः स
दाहृतं॥ ५७॥ भास्करस्य मखाच्छ्रुत्वा स्नानमभिवाचयत्॥ ययुः सूर्यस्य निकटे गायन्तो भास्करस्तुतिं॥ ५८॥ इत्येतत्सर्वमाख्या
तं कार्त्तिकस्य व्रतोत्तमं॥ यत्कृत्वा सर्वपापेभ्यो मुक्तो भवति तत्क्षणात्॥ ५९॥ अतः परं किं वक्ष्यामि तद्ब्रूह्यात्रेय सत्वरम्॥ ॥
इति श्रीसनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये चतुर्विंशतितमोध्यायः॥ ॥आत्रेय उवाच॥ ॥अद्भुतोयं त्वया प्रोक्तो म
हिमा कार्त्तिकस्य तु॥ स्वस्य कर्त्तुमसामर्थ्ये कथमेतत्फलं नराः॥ १॥ कुमार उवाच॥ ॥नास्ति कर्त्तुं स्वसामर्थ्यमुपायात्प्राप्य
ते फलं॥ द्रव्यं दत्वा ब्राह्मणाय गृहस्थीयात्फलमुत्तमम्॥ २॥ शिष्याद्वा भृत्यवर्गाद्वा स्त्रीभ्यो वा प्राप्यकारयेत्॥ तस्मादपि फलं प्रा
प्य फलभाक् जायते नरः॥ ३॥ आत्रेय उवाच॥ ॥अद्यान्नान्यपि पुराणानि प्राप्यते नैकेन किंचित्॥ स्नानादि कामयहं श्रोतुं कौ
तुकं मम वर्त्तते॥ ४॥ सनत्कुमार उवाच॥ ॥अदत्तान्यपि पुराणानि लभंते यान कान्यपि॥ येनोपायेन तद्वक्ष्ये शृणुतैकमनाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुर्यान्मंडपिकां शुभाम् ॥ २ ॥ तुलसीमूलदेशे च सर्वतोभद्रमेव च ॥ निर्ऋत्यग्रगता रेखा ऊनविंशतिसंज्ञका ॥ ३ ॥ खंडेंदुस्त्रिपदः कोणे
शृंखला पंचभिः पदैः ॥ एकादशपदा वल्ली भद्रं तु नवभिः पदैः ॥ ४ ॥ चतुर्विंशत्पदा वापी परिधिर्विंशतिः स्मृतिः ॥ मध्ये षोडश
भिः पद्ममष्टदलं स्मृतम् ॥ ५ ॥ खंडेदेवो वेदसंख्या वाप्यो पिंडे नवांशकाः ॥ वनस्त्वभं खलाश्यामा स्तंभमग्राष्टकं स्मृतं ॥ ६ ॥ वस्त्रकं नी
लतूपंपीनस्तुपरिधिर्भवेत् ॥ कमलं पंचवर्णाढ्यं यथाशोभं तु ओलखेत् ॥ ७ ॥ तस्योपरि स्थापयेत्कलशं पंचरत्नसमन्वितं ॥ पूजयेत्तत्र
देवेशं सौवर्णां गुर्वंतु ज्ञया ॥ ८ ॥ रात्रौ जागरणं कुर्याद्गीतनृत्यादिमंगलैः ॥ ततस्तु पौर्णमास्यां वै सपत्नीकान्द्विजोत्तमान् ॥ ९ ॥
त्रिंशन्मितानथैकं वा स्वशक्त्या विनिमंत्रयेत् ॥ अतो देवा इति द्वाभ्यां होमयेत्तिलपायसं ॥ १० ॥ ततो गां कपिलां दद्यात्पूजयेद्वि
धि वद्गुरुम् ॥ परा तु पौर्णमास्यत्र यत्रास्यां पुष्करस्य तु ॥ ११ ॥ एवमुद्यापनं कृत्वा सम्यग्व्रतफलं भवेत् ॥ दत्वा यमो विप्रमे
त्ययरूपो भवत्तनः ॥ १२ ॥ तस्यां जपं ज्ञं तदत्तं तदक्षय्याफलं स्मृतम् ॥ कार्तिक्यां पूर्णिमायां तु विष्णुनी राजपेल्सदा ॥ १३ ॥ प्रदो
षसमये राजन्नसदारिअमागुयान् ॥ कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनं ॥ १४ ॥ सप्तजन्म भवेद्विप्रो धनाढ्यो वेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वकशिष्याभ्यां षड्भांशं प्रगृह्य माहरेत्॥ १८ ॥व्यवहारात्तथा प्रीत्या नितरां संभाषणादिभिः॥ दशांशं प्रगृह्य पापानां लभते
नात्र संशयः॥ १९ ॥अत्रैवोदाहरन्तीममितिहासं पुरातनम्॥ वाराणस्यां बलदत्तो भरद्वाजकुले भवत्॥ २० ॥वेदवेदां
गविद्विज्ञो जपध्यानपरायणः॥ सुशीला नाम तद्भार्या सुशीला नतागिभा॥ २१ ॥एकदंतसुतः सोपि सर्वविद्याम
वीनवान्॥ नातरां स वयः प्राप्य कामाविष्टस्तदाभवत्॥ २२ ॥तस्य रूपावली भार्या वनराजीव सुंदरी॥ पतिव्रता पितादिवा
सोपि कामवशं ययौ॥ २३ ॥परस्त्रीव्यसनार्त्तेन वरूढं वंशविनाशिनम्॥ पितुर्दुःखभयाल्लोकान्नोचुः किंचित्सुभाषुभम्॥
२४ ॥मात्रा निवारितोभूयो व्यसनं सो त्यजन्नच॥ ततश्च पतितं भार्या धिक्कृतो निसुहृज्जनः॥ २५ ॥महापापाश्रयान्येव परस्त्रीव्य
सनाय सः॥ परस्त्रीव्यसनासक्त्या वयो नीनमजानता॥ वह्निशिखाक्षिप्तं नैव कोपि स विमोहितः॥ ततश्चौर्यं समारब्धो परस्त्री
सुखलब्धये॥ २६ ॥ततो लोकैश्च तज्ज्ञानं भीत्या कारयान्पलायितः॥ एकदा तस्य दावित्ताशुपलेभे कयाप्यहम्॥ २७ ॥मा
र्गे नभीज्ञो गच्छन्स शनैर्देशान्विलोकयन्॥ देशाद्देशान्तरे गच्छन्प्रयागान्तीरमागतः॥ २८ ॥स्नानार्थं कार्त्तिके मासि तत्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.स्म.
५६

खलु॥ ५ ॥कृतं वाऽकृतं वा कृतमेकेन यत्कृते। जायते तस्य तद्ध्रुहन्त्रोर्नृ(पां)पुरे भवेत्॥ ६ ॥द्वापरे वंशमध्ये तु कलौ कर्त्तैव केवलम्
॥अज्ञानाद्यत्कृतं कर्म बाल्ये स्वप्ने तु तत्फलम्॥ ७ ॥अज्ञानाद्यत्कृतं पापं बाल्ये तस्य फलं भवेत्॥ ज्ञानपूर्वकृतं कर्म आजन्मान्तं च तत्फ-
लम्॥ ८ ॥परमात्मसंपापिसंगेन नरः पापी प्रजायते। पापिनां वा धर्मिणां वा संसर्गो दशमांशकम्॥ ९ ॥भोजनादेकपंक्तौ च विं-
शांशः पापपुण्ययोः॥ एकासने द्वयोर्वासात् ह स्वांशेन लिप्यते॥ १० ॥यो यस्यान्नं समश्नाति स भुंक्ते तस्य किल्बिषं। जपादौ पापि-
संसर्गान्मोऽड्शांशो विनश्यति॥ ११ ॥परस्य त्वेव तावानार्येकपात्रस्य भोजनात्॥ एकशय्याप्रावरणात्षडंशः पुण्यपापयोः
॥ १२ ॥पुत्रस्पोहरते सर्वं भार्यायाओरसस्य वा। अर्द्धं शिष्याश्च तथा पांशं पापं पुण्यं तथैव च॥ १३ ॥भर्त्तुरात्ताकरी नारी भर्त्तुरर्द्धंह-
पहरेत्॥ यद्वैश्वखलु भुंजीयात् दशांशं तद्गृहे हरेत्॥ १४ ॥वर्षाशनं च यो दत्ते तस्यार्द्धं पुण्यभागयं॥ वर्षाशनार्थी नृपाणां तद्भुंक्ते व-
र्षाशनी नरः॥ १५ ॥पुरोहितस्य षडांशं पापं वा पुण्यमेव च। यजमानो भुनक्त्येवं नरः स्वांशं पुरोहितः। उद्योगी चानुमंता च य-
श्चोपकारी प्रदः॥ षडंशं पुण्यपापानां उपदेष्टा दशांशकं॥ १६ ॥यद्वलात्कार्यते कर्म नान्यस्मै प्रयच्छतु। विनाश्च

56
राम.
५६

कस्तगान्विताः॥ केचित्तुलसीमिश्रं जलं विक्षिप्य ददाम्॥ ४२॥ यमदूतैस्तदा बद्धस्ताडितोनेकधा ततः॥ यमस्य सविधे नीत(
स्तं दृष्ट्वा सूर्यनन्दनः॥ ४३॥ अब्रवीच्चित्रगुप्तं वै किमस्य दुष्कृतं कृतम्॥ ॥चित्रगुप्त उवाच॥ ॥ज्ञानताज्ञानतो विप्रेणाकृतं क
र्मशुभं बहु॥ ४४॥ तस्माद्विरूपवासाय योग्योयं नात्र संशयः॥ चित्रगुप्तवचः श्रुत्वा यमः प्रेतपमब्रवीत्॥ ४५॥ यम उवाच
॥ ॥प्रेतपेमं द्विजं शीघ्रं नरके विनिपातय॥ प्रेतपस्तु ततो धृत्वा तं विप्रं नरकेऽनयत्॥ ४६॥ नानाभयानकान् दृष्ट्वा नरका
स्तेन वै तदा॥ भयेकंपित आहेदं हा तथा जन्म विनाशितं॥ ४७॥ प्रेतपेन ततः श्वभ्रे नरकान् क्रमशो विश॥ यदासौ नाविशत्त
त्रैतैलतप्तकटाहके॥ ४८॥ कुंभीपाकाभिधे क्षिप्तः सुखमास्ते यदा गृहे॥ जलस्थ घर्मेन प्रोहितथाय मभवद्द्विजः॥ ४९॥
तद्दृष्ट्वा धर्मराजोपि किमिदं कस्य कर्मणः॥ फलं विचारयेद्यावत्तावत्तत्र समागतः॥ ५०॥ नारदः सर्वदर्शी च यमं प्रोवाच ६२
सादरं॥ एकादंतः समानेयो नाथ मर्हतियातनां॥ ५१॥ अनेन किल कालिं घाऊर्जे मासि समागते॥ स्नानार्थं सुजनैः सा
र्द्धं मासः सर्वो निवाहितः॥ ५२॥ तेन पुण्यप्रभावेन भ्रीरापानकमस्य वै॥ अतः प्रदर्शय नरकान्ने योसो स्वर्गमेवहि॥ ५३

का.मा. लोकाः समागमन्॥ कार्त्तिकव्रतिनस्तत्र नानादेशसमागतान्॥ ३०॥ वरान्ददर्श स्त्रीश्चापि रूपावयमान्विताः॥ सदृष्ट्वा कौतु
५० कं पश्यन् मासमेकं उवास ह॥ ३१॥ न तन्मध्ये कोपि जनः श्रुद्धित्तं वेदुमर्हनेः॥ संध्याकाले भ्रमंस्तत्र स्त्रीणां दर्शनलालसः॥ ३२
॥ ददर्श ब्राह्मणांस्तत्र जपदेवार्चनस्थितान्॥ कांश्चित्पुराणपठनः कांश्चिन्नत्श्रवणोरतान्॥ ३३॥ नृत्यतो गायतः कांश्चिद्विष्णु
स्तवनतत्परान्॥ तुलसीधारिताः कांश्चिद्विष्णुमुद्राङ्कितान्परान्॥ ३४॥ नित्यं परिभ्रमंस्तत्र दर्शनस्पर्शभाषणैः॥ प्रापात्मनां
जनानां च पापं तस्य क्षयं ययौ॥ ३५॥ पौराणमाल्यानतो पश्यद्द्विप्रमो पूजनादिकं॥ दक्षिणाभोजनाद्यं च दीपदानादिकं तथा॥
३६॥ रात्रौ दीपोत्सवं पश्यन् परस्त्रीकामुकः सन्॥ नर्त्तोदैरात्रसमये राजन्यस्य स्त्रियं बलात्॥ ३७॥ जग्राह बालिलिंगासौ द
ष्टस्तस्य पतिनानदा॥ दृष्टमात्रस्तु तेनाथ तां विहाय पलायितः॥ ३८॥ स्वकरं तस्य मार्गेत्वस मेघ्रि रथातघदा॥ एदाकुनानदाद राम.
ष्टः सद्यो मृत्युमुपाययौ॥ ३९॥ बहवो मीलिताः तत्र वैष्णवाः पुण्यशालिनः॥ एकदं तद्द्विजः सोयं दष्टः सर्पात् दैवतः॥ ४०॥ ५०
किंकरिष्यति यज्ञाविनन्तकेनापि वार्यते॥ इत्युक्तु राम रामेति केचिद्विप्राः शिवस्य च॥ ४१॥ करोंजपं स्तु तारे रास्वरे॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ७ ॥ श्रद्धामेधाविधानिभ्यौ वर्त्तेते ऽभि सर्वदा ॥ ताभ्यां व्याप्तस्तु मनुजः श्रीविष्णोश्चरणादिकम् ॥ ८ ॥ नकरोति मुद मेधाज
नो धीयानि वै नमः ॥ ॥ आत्रेय उवाच ॥ दुर्जनस्तोयपापनादावशक्तः सिद्धिभाक्कथं ॥ ९ ॥ कथं विमुच्यते जन्तुर्दुःख
संसारसागरात् ॥ सनत्कुमार उवाच ॥ ॥ भक्त्या पाद्मजमाहात्म्यं नियमेन शुचिः पुमान् ॥ १० ॥ संपूर्णमथवाध्यायमेकश्लोकं
मथापि वा ॥ ब्राह्मणान्भोजयेत्कृत्वा तेभ्यो दद्याच्च दक्षिणाम् ॥ ११ ॥ मुहूर्त्तं वापि शृणुयात्कथां पुण्यां दिने दिने ॥ यदि प्रतिदि
नं श्रोतुमशक्तः स्यात्तु मानवः ॥ १२ ॥ पुण्यमासेऽथवा पुण्यतिथौ संशृणुयादपि ॥ तेन पुण्यप्रभावेन पापमुक्तो भवेन्नरः ॥
१३ ॥ पुराणज्ञः शुचिर्दक्षः शान्तो विगतमत्सरः ॥ साधुः कारुण्यवान्वाग्मी वदेत्पुण्यां कथां शुभां ॥ १४ ॥ व्यासासनसमारूढो यदा
पौराणिको भवेत् ॥ आसमाप्तिप्रसंगस्य नमस्कुर्यान्न कस्यचित् ॥ १५ ॥ न दुर्जनसमाकीर्णे न शूद्रश्वापदावृते ॥ देशे न
द्यूतसदने वदेत्पुण्यां कथां सुधीः ॥ १६ ॥ श्रद्धाभक्तिसमायुक्ता नान्यकार्येषु लालसाः ॥ वाग्यताः शुचयो दक्षाः श्रोतारः पु
ण्यभागिनः ॥ १७ ॥ अभक्त्या ये कथां पुण्यां शृण्वन्ति मनुजाधमाः ॥ तेषां पुण्यफलं नास्ति दुःखं स्याज्जन्मजन्मनि ॥ १८ ॥ पौरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.म्प.
५८

ततोनारदवाक्येन दर्शयित्वा द्विजस्य तु ॥ नरकान्बहुदुःखाढ्यानेकाशीतिप्रभेदकान् ॥ ५४ ॥ ततोनीतः स्वर्गमसौ पुण्यभोगाय देव(
वत् ॥ अतः संसर्गजं पुण्यं पापं वापि भवेद्ध्रुवम् ॥ ५५ ॥ तस्मात्सतां संगतये यतितव्यं सुधीमता ॥ असत्संगाद्यतः पुण्यमर्जितं(
च विनश्यति ॥ ५६ ॥ इतिहासमिमं श्रुत्वा शुभं प्राप्नोति मानवः ॥ स एष सत्संगमहिमा उक्तोन्यत्किं विवक्षितं ॥ ५७ ॥ इति सनत्कु(
मारसंहितायां कार्त्तिकमाहात्म्ये पंचविंशतितमोध्यायः ॥ ॥आत्रेय उवाच॥ ॥ईदृशं कार्त्तिकव्रतमल्पायासं महाफ(
लं ॥ न कुर्वन्ति जनाः केचित्किमर्थं मुनिसत्तम ॥ १ ॥सनत्कुमार उवाच॥ ॥स्वसृष्टिं वर्द्धयन्वेधा धर्माधर्मौ ससर्ज ह ॥ धर्म(
मेवानुतिष्ठन्तः प्राप्नुवन्ति शुभां गतिं ॥ २ ॥ अधर्ममनुतिष्ठन्तो यांति ते धामतिं नराः ॥ पुण्यकर्मफलं नाको नरकस्तद्विपर्ययः
॥ ३ ॥ तयोः पालनकर्त्तारौ धातैव विधिना कृतौ ॥ शतक्रतुर्यमौ तौ च पुण्यपापानुसारिणौ ॥ गुरुतल्पादयः पुत्राः कामस्य(
चितास्तु वि ॥ क्रोधस्यापि तु पातकाद्या लोभस्य तनयाः स्मृताः ॥ ५ ॥ ब्रह्महत्यादयश्चैते नरकनायकाः ॥ कृतायमेन
तैर्व्याप्ता मनुजा नहि कुर्वते ॥ ६ ॥ व्रतादि धर्मकृत्यं यत्तैर्मुक्ता लेहि कुर्वते ॥ अथश्वापचेवद्धमेधा अविद्यायाः सुतेउभे

58
रास.
५८

णिकंचसंपूज्यांचवस्त्रादिभिःशुभैः ॥ श्रावयंतुकथांभक्त्यानदरिद्रिनपापिनः ॥ १९ ॥ कथायांकीर्त्यमानायांगच्छंत्यन्यत्रयेनराः ॥ भो
गांतेरौप्रणाश्यंतितेषांदाराश्चसंपदः ॥ २० ॥ उच्चासनसमारोहेनरकोऽप्राप्तोभवेत् ॥ विषह्क्षस्तथास्वापेवनेअजगरोभवेत्
॥ २१ ॥ कथायांकीर्त्यमानायांविघ्नंकुर्वंतियेनराः ॥ कोघवंनरकेभुक्त्वाभवंतिग्रामसूकराः ॥ २२ ॥ येश्रावयंतिमनुजाःकथां
पौराणिकींशुभां ॥ कल्पकोटिशतंसाग्रंतिष्ठंतिब्रह्मणःपदे ॥ २३ ॥ आसनार्थंप्रयच्छंतिपुराणज्ञस्ययेनराः ॥ कंबलाजिनवासां
सिमंचंतूलकमेववा ॥ २४ ॥ परीधानायवस्त्राणिप्रयच्छंतिचयेनराः ॥ तेषांभुक्तिश्चमुक्तिश्चभविष्यतिनसंशयः ॥ २५ ॥
॥ ○ ॥ इतिश्रीसनत्कुमारसंहितायांकार्त्तिकमाहात्म्येषड्विंशोध्यायः ॥ २६ ॥ ○ ॥ शुभम् ॥ श्रीदामोदरायनमः ० हरे ॥